# UNIT – I : वैदिकानां परिचयः

1.1 Learning Objectivies

1.2 वैदिकऋषीणां परिचयः

1.3 वंशमण्डलम्

1.4 वेदभाष्यकाराणां परिचयः

1.5 पाश्चात्यवैदिकभाष्यकाराः

1.6 प्राच्यवैदिकभाष्यकाराः

1.7 Model Questions

1.8 Further Readings

## 1.1 Learning Objectives :

1 -Vedas are the most ancient books….

2 - Vedic Rsi is a seer not a writer…..

3 - Vedas can be understood through the illustrations….

4 – Occidental scholars who commented on Vedas…..

5 – Oriental Scholars who commented on Vedas…..

## 1.2 वैदिकऋषीणां परिचयः

ऋग्वेदस्य विभागक्रमे मण्डलक्रमःप्रामाणिको भवति। दशमण्डलेषु द्वितीयमण्डलतःअष्टममण्डलं यावत् सप्तमण्डलानि वंशमण्डलमिति (Family Books)नामितम्। नवम-मण्डलं पवमान-मण्डल-नाम्ना परिचीचते। पवमान अत्र सोमदेवता। सोमलतायाः रस एव सोमपवमानम्। प्रथममण्डलं दशम-मण्डलञ्च द्वे अर्वाचीनमण्डले। प्रत्येकं वंशमण्डलं एकेन ऋषिणा तस्य वंशजेन वा संलग्नं भवति। यथा-

## 1.3 वंशमण्डलम्

<u>मण्डलम्</u> - <u>ऋषिः</u>

द्वितीयम् - गृत्समदः

तृतीयम्- विश्वामित्रः

चतुर्थम् - वामदेवः

पञ्चमम् - अत्रिः

षष्ठम् - भारद्वाजः

सप्तमम् - वशिष्ठः

अष्टममण्डलस्य ऋषिः कण्वः वंशश्च अङ्गीरा भवति। प्रथममण्डले अग्निसूक्तस्य ऋषिः मधुच्छन्दा विश्वामित्रस्य पुत्र इति उल्लिखितम्। प्रथम-मण्डलस्य ऋषिः शतर्चिन इति उच्यते। दशममण्डले दार्शनिक-सूक्तानांविविधताहेतोः ऋषि-परम्परा न लक्ष्यते।

एते ऋषयः मन्त्राणां द्रष्टा रूपेण परिचीयन्ते न तु कर्त्ता रूपेण। ऋषयः मन्त्रान् आकाशात् समाहृत्य पद्याकारेण उपस्थापितवन्तः। तेषां मन्त्राणाम् अवबोधनार्थं पदपाठ-भाष्यादीनां

रचना कृता। वैदिकव्याकरणस्य आवश्यकतामनुभूय वेदज्ञाःशाब्दिकान्वय-व्युत्पत्त्यादीन् रचितवन्तः। निर्घण्टु-निरुक्तौ अस्य प्रमाणौ स्तः। यास्कस्य निरुक्त एव वैदिकशब्दानां निरुक्तिः विद्यते। ब्राह्मणग्रन्थेषु अपि मन्त्राणाम् उद्देश्य-विधि-वाख्यादयः प्रदत्ताः। अत्र केवलं वेदभाष्यकाराणामालोचनम् उद्दिष्टमस्ति।

अथर्ववेदस्य ऋषी अथर्वणअंगिरा च इत्युच्यते। तौ तारण-मारण-उच्चाटनात्मकान् मन्त्रान् प्रदत्तवन्तः। विषयवस्तुदृष्ट्या एषः वेदः ऋग्वेदात् सम्पूर्णतःभिन्नः स्वतन्त्रश्च।

## 1.4 वेद-भाष्यकाराणांपरिचयः

चतुर्णां वेदानां अर्थज्ञानाय विविधाः ग्रन्था उपलभ्यन्ते। प्रथमतः ब्राह्मणग्रन्थाः मन्त्राणामुपादेयतां प्रतिपादयन्ति। निर्घण्टु-निरुक्ताभ्यां व्युत्पत्तिगतार्थाः स्पष्टीक्रियन्ते। व्याकरणादि-वेदाङ्गैः वैदिक-भाषावबोधने सहायता प्राप्यते। परन्तु मन्त्राणां अन्वयच्छेदे अर्थानां च विशदीकरणे सायणादीनां भाष्यस्य का आवश्यकता वर्त्तते तद् सर्वैरेव ज्ञातम्। वेदानां भाष्यकरणे प्राच्य-पाश्चात्य-विदुषामवदानं महत्त्वपूर्णं भवति।पाश्चात्य-विद्वांसः संस्कृतभाषा-साहित्यमुपरि शोधं कृत्वा विदेशे वेदादीनां ग्रन्थानां माहात्म्यं उद्घोषितवन्तः।अत्र कतिपयानां प्रमुखानां भाष्यकाराणां परिचयः केवलं प्रदत्तम्। प्रथमतः पदपाठदृष्ट्या ऋषीणां परिचयमत्र आलोचयामः ।

शाकल्यः - ऋग्वेदस्य पदपाठस्य प्रस्तौता इति ज्ञायते एषः ऋषिः। सः उपनिषद्काले आविर्भूतासीदिति ऋक्प्रातिशाख्य-निरुक्तादि-ग्रन्थेषु उल्लिखितम् । जनकस्य सभायां याज्ञवल्क्येन सह शाकल्यः शास्त्रार्थं कृतवानिति उपनिषदि प्रमाणं प्राप्यते। अन्याः ऋग्वेद-पदपाठ-रचयितारोऽपि सन्ति येषु रावणस्य नाम प्रसिद्धं भवति।

आत्रेयः – यजुर्वेदस्य तैत्तिरीयसंहितायाः पदपाठकृत्रूपेण आत्रेयस्य नाम उच्चार्यते। एषः ऋषिः शाकल्यस्य समकाले आविर्भूतः भवेदिति मन्यते।

गार्ग्यः – सामवेदस्य पदपाठकृदिति गार्ग्यस्य नाम आयाति। तेन पदच्छेदे बहुमात्राणि व्यवह्रियन्ते। अतः स्कन्दस्वामिना उक्तम् –'एकमिति शाकल्यः ,त्रीणीति गार्ग्यः'। यथा – मेहन् (शाकल्यः) म+इह+न् (गार्ग्यः)

अथर्ववेदस्य पदकारस्य परिचयः कुत्रापि नोपलभ्यते। अस्य वेदस्य पदपाठः ऋग्वेदस्येव क्रियते।

## 1.5 पाश्चात्य-वैदिक-भाष्यकाराः

### FriedrichMaxmuller: (6 Dec.1823-28 Oct 1900)

पाश्चात्यविद्वत्सु मैक्समूलर्वेद-दर्शन-भाषाविज्ञानादीनां व्याख्यानं कृत्वा बहुग्रन्थान् रचितवान्। सः 1823-1900 खीष्टाब्द-पर्यन्तं कार्यरत आसीत्। Sacred Books of The East Seriesनाम्ना प्रकाशित-गवेषणात्मक-ग्रन्थेषु बहुमूल्यालेखान् अलिखत्। सः सायणस्य वेदभाष्यमपि संयोज्य 1849-1873वर्षमध्ये वेदान् संकलितवान्।जर्मन् देशस्य भाषाविद् संस्कृतभाषामधीत्य भारतीयज्ञानस्य प्रचारं प्रसारञ्च कृतवान्।तस्य प्रसिद्धग्रन्थः India: What can it teach us केम्ब्रिज् विश्वविद्यालयतः प्रकाशितो अभूत्। तस्मिन् आख्यानमाला-शृङ्खलायां बहु गवेषणात्मक-सन्दर्भान् प्रकाशितवान्।1859 वर्षे तेन लिखिते History of Ancient Sanskrit Literature ग्रन्थे वैदिकग्रन्थानां विशदं विवरणं प्रदत्तमस्ति।

## Sir William Jones (1746-1794)

वेष्टमिनिस्टर्,लण्डन् प्रान्ते सेप्टेम्बर् मासस्य 28 तारिकायां 1746तमे वर्षे जन्मग्रहणमकरोत्। भारतवर्षस्य कोल् काता-नगरे 1794तमे वर्षे एप्रिल् 27 तारिकायां दिवत्वं गतः।सोऽपि भाषाविदासीत्। तेन एव Asiatic Society of Bengalप्रतिष्ठापितम्। अस्यां संस्थायां बहुसंख्यक-पाण्डुलेखाः संगृहीतासन्। येन संस्कृतग्रन्थाः शोधोपरान्तं प्रकाश्यते।

## Rudolf Von Roth: (3rd April 1821- 23rd June 1895)

जर्मन् विद्वान् रोथ्1846 तमे वर्षे On the Literature and History of the Veda नामकग्रन्थं अरचयत्। संस्कृतशब्दकोषेण सह यास्क-विरचित-निरुक्तस्यसम्पादनमपि अकरोत्। अथर्ववेदस्य संकलनकार्य्ये ह्विट्नि-महोदयस्य मार्गदर्शकासीत्।

## Albrecht Friedrich Weber: (17th February 1825 – 30th November 1901)

एषःजर्मन्विद्वान् महीधर-भाष्यं संयोज्य शुक्ल-यजुर्वेदस्य सम्पादनमकरोत्। History of Indian Literature अपि तेन विरचितमासीत्।वर्लिन् विश्वविद्यालये 1856-तमे वर्षे नियुक्तो भूत्वा 1867-वर्षे प्राचीन-भारतीय-भाषा-साहित्य-विभागे प्रोफेसर् पदमलङ्कृतवान्।

## William Dwight Whitney: (9th February1827- 7th June1894)

अमेरिका-देशे आविर्भूय भाषाविद् ह्विट्नि भाषाविज्ञानमुपरि बहुग्रन्थान् आलेखाञ्च अलिखत्। सः Yale विश्वविद्यालये अध्यापनामकरोत्। वेदमाधारीकृत्य Oriental and Linguistic Studies, First series(1872) पक्षतः तस्य ग्रन्थाः प्रकाशिता आसन्। यथा- The Veda, The Avesta ,The Science of Language। Second

Series-पुस्तके The East and West(1874)तथा1879 वर्षे वेद्-ब्राह्मणयोः कथित-लौकिक-भाषामधिकृत्य व्याकरणग्रन्थं रचितवान्। पुस्तकत्रयेषुअथर्ववेद-संहिताया अनुवादञ्च अकरोत्।

**Maurice Bloomfield: (23rd February 1855 - 12th June1928)**

अष्ट्रिआ-देशे जन्मितः मौरिष् अमेरिका-देशस्य शिकागो विश्वविद्यालये शिक्षाग्रहणमकरोत्।तथा जोन्स् होप्किन्स् विश्वविद्यालये संस्कृतं-भाषाविज्ञानविभागे अध्यापनामकरोत्। तेन विरचिते The Religion of the Veda (The ancient Religion of India)नामकग्रन्थे अमेरिका लेक्वर्स अन् द हिस्टरी अफ् रिलिजिअन्स् पक्षतः सप्तम श्रृङ्खलायां वेददारभ्य उपनिषदामालोचनं कृतम्। 1892मितात् 1906मित-वर्षमध्ये A Vedic Concordance:An Alphabetic Index… नामकग्रन्थोऽपि तेन कल्पित-प्रस्तुत-प्रकाशितश्च।

**Ralph Thomas Hotchkin Griffith: (25th May 1826- 7th November 1906)**

ग्रीफिथ् भारतीय-शिक्षा-सेवायां सभ्यासीत्।इन्ग्लण्ड-मूल-विद्वानयं वनारस् महाविद्यालये अध्यक्ष-पदे अधिष्ठितासीत्। मैक्समूल्लर् -महोदयमनुसृत्य सायण-भाष्याधारेण वेदानां आङ्ग्ल-भाषायामनुवादः कृतस्तेन। सः माद्रास्-नीलगिरि-कोतगिर्य्यामवसत्।तथा तत्रैव मृतः जातः।

वैदिकग्रन्थानामनुवादकेषुGrassman-H.H.Wilson-A.Ludwig-H.Oldenberg-A.B.Keith-Macdonell-आदीनामवदानमपि सर्वविदितं भवति । वैदिकछन्दसामुपरि E.V.Arnold'VedicMeter' नामकं ग्रन्थं रचितवान्।

एतदतिरिक्तं अन्येऽपि पाश्चात्य-विद्वांसः संस्कृत-भाषा-साहित्योपरि बहुमूल्यावदानं कृतवन्तः। अत्र वैदिक-भाषा-साहित्यस्य प्रमुख-गवेषक-ऐतिहासिक-अनुवादकानामालोचनं कृतम्।

## 1.6 प्राच्य-वैदिक-भाष्यकाराः

वैदिकमन्त्राणां व्याख्या प्रथमतः ब्राह्मण-आरण्यक-उपनिषदादिग्रन्थेषु प्राप्यते। यज्ञदृष्ट्या एषा व्याख्या कृता। शौनकस्य चरणव्यूह-सूत्रपरिशिष्ट एव वेदानां प्राचीनभाष्यरूपेण स्वीक्रियते। यास्केन वेद-मन्त्राणां व्याख्यानम् आध्यात्मिक-आधिदैविक-आधिभौतिक-क्रमेण त्रिधा विभज्यते। खीष्टपूर्व-सप्तम-शतक-पूर्वमेव आसन् शौनक-यास्कादयः। जैमिनीय-मीमांसा-सूत्रं वेदानां धार्मिक-कर्मणः भाष्यमिति विदितम्। परन्तु वेदानां टीकाकार-रूपेण स्कन्दस्वामी अग्रे गण्यते।

**स्कन्दस्वामी –(625AD)**

स्कन्दस्वामी ऋग्वेद-संहितायाः भाष्यस्यान्ते आत्मनः परिचयं ददाति। गुजराट्-प्रान्तस्य वलभी-नगरवासी सः भर्तृध्रुवस्य पुत्रासीत्। न केवलं ऋग्भाष्यम् अपितु निरुक्तस्योपरि सः टीकामरचयत्। ऋग्वेदस्य केवलं चतुर्थ-अष्टकं यावत् भाष्यं स्कन्दस्वामिना कृतम्। शेषभागानां टीका नारायणेन(630खी.अ.) उद्गीथेन(630खी.अ.) च रचिता। ऋग्वेदीयपदकाराणां कृते स लिखति –'विचित्राः पदकाराणामभिप्रायाः' ।

**महीधरः – (16th c.AD)**

वेदभाष्यकारः महीधरः मन्त्रमहोदधिः तथा वेददीपइति टीकाद्वयं रचितवान्। काशीनगरे नागर-ब्राह्मण महीधरः 1588 तमे वर्षे मन्त्रमहोदधिं अलिखत्। एतत् तान्त्रिकग्रन्थ इति सूचितम्। वेददीप-ग्रन्थस्तु शुक्लयजुर्वेदीय-माध्यन्दिन-संहिता-उपरि पर्यवेशितम्।

निरुक्तादीनां उद्धरणैः स्वव्याख्यानं प्रमाणीकरोति। एकादशशतकस्य उत्तरार्द्धे आविर्भूत-उव्वटस्य प्रभावो महीधरस्य टीकोपरि दृश्यते।

**<u>सायणः – (……. - 1387AD )</u>**

सायणः वेदार्थप्रकाशः नाम्ना वेदभाष्यं लिखितवान्। तत्पश्चात् सामभाष्यं काण्वभाष्यं अथर्वभाष्यं तथान्येषां ब्राह्मणादि-वैदिकग्रन्थानां भाष्यमपि अरचयत्। अथर्ववेदस्योपरि केवलं सायणेन भाष्यं कृतम्।पञ्च-संहितानां तथा त्रयोदश-ब्राह्मण-आरण्यकानां भाष्याणि केवलं सायणेन एव विरचितानि।

<u>पञ्च-वेदभाष्यम्</u>

कृष्णयजुर्वेदीय-तैत्तिरीय-संहिता

ऋग्वेद-संहिता

सामवेद-संहिता

शुक्लयजुर्वेदीय-काण्व-संहिता

अथर्ववेद-संहिता

दाक्षिणात्ये विजयनगर-राज्यस्य वेदभाष्यकारः सायणः मायणस्य श्रीमत्याश्च पुत्रः भवति।हाम्पी-निवासी-भारद्वाज-गोत्रीय सायणः तथा तस्य अग्रजः माधवाचार्यः विजयनगर-राज्ये पण्डित-सभायां अधिष्ठितौ आस्ताम्। भ्राता माधवः तस्य आदर्शः आसीत्। तस्य गुरोर्नाम विद्यातीर्थः।श्रृङ्गेरी-आश्रमतः सः विद्याप्राप्तिमकरोत्। महाराजा वुक्कराय-प्रथमस्य तथा तस्य उत्तराधिकारी-हरिहर-द्वितीयस्य राजत्वकाले सः वेदभाष्यं रचितवान्।सः 1364 मितात् 1378 खी.अ. पर्यन्तं वुक्करायस्य पुनः1379-1387 खी.अ.-पर्यन्तं हरिहर-द्वितीयस्य प्रधानमन्त्री आसीत्। 1387तमे वर्षे सः पञ्चत्वं प्राप्तः।

माधव-भेङ्कटमाधव-उवट-षड् गुरुशिष्यादीनां भाष्यमपि विद्यन्ते।

## 1.7 MODEL QUESTIONS:

**अतिसंक्षिप्तप्रश्नाः –(02x__)**

1 -ऋग्वेदे कति मण्डलानि सन्ति ?

2 -वंशणण्डलं किम् भवति ?

3 -विश्वामित्रः कस्य मण्डलस्य ऋषिः ?

4 -कः शतर्चिनः ?

5 -ऋग्वेदपदपाठस्य रचयिता कः ?

6 -कः Sir William Jones ?

7 – 'Vedic Meter' इति ग्रन्थः केन विरचितः ?

8 -स्कन्दस्वामिनः कालं सूचयत।

9 -उव्वटः कदा आविर्भूतोऽभवत् ?

10 -सायणस्य पितुःनाम किम् ?

**टिप्पणी लिखत - (05x__)**

महीधरः, वंशमण्डलम्, पञ्चवेदभाष्यम्,Griffith, Max Muller, Whitney.

**दीर्घोत्तरप्रश्नाः – (10x__)**

1 -पाश्चात्यवेदभाष्यकाराणां परिचयं दत्त ।

2 -प्राच्यवेदभाष्यकाराणाम् अवदानम् आकलयत।

3 -वेदपदकाराणां सूचनां प्रदत्त ।

**अतिदीर्घोत्तरप्रश्नाः - (15 x 1)**

1 -वैदिकभाष्यकाराणां परिचयं विस्तारेण प्रतिपादयत ।

## 1.8 FURTHER READINGS:


1- Winternitz M, The History of Indian Literature,vol.1, MLBD,Delhi.

2- आचार्य बलदेव उपाध्याय,वैदिक साहित्य और संस्कृति,शारदा संस्थान,वाराणसी,1989.


=====

## UNIT- 02: काव्यनाट्यकाराणां परिचयः


2.1 पठनस्य उद्देश्यः

2.2 दृश्यकाव्यं ------------------------15

रूपकम् --------------------------15

उपरूपकम्------------------------15

2.3 श्रव्यकाव्यम् ----------------------17

2.4 कालिदासः ------------------------17

2.4.1 तस्य कृत्तयः ---------------------17

1- कुमारसम्भवम् -------------------17

2- रघुवंशम् ------------------------18

3- अभिज्ञानशाकुन्तलं नाटकम् ------18

4- विक्रमोर्वशीयम् त्रोटकम् ----------19

5- मालविकाग्निमित्रम् नाटकम्20

6- मेघदूतम् खण्डकाव्यम् (गीतिकाव्यम्)20

7- ऋतुसंहारम् गीतिकाव्यम् -----------21

2.5 भासः -------------------------------21

भासनाटकचक्रम् --------------------22

2.5.1 महाभारताश्रितरूपकाणि ----------22

1- दूतवाक्यम् ---------------------22

2- कर्णभारम् --------------------22

3- दूतघटोत्कचम् ----------------23

4- मध्यमव्यायोगः ---------------23

5- पञ्चरात्रम् --------------------24

6- उरुभङ्गम् ---------------------24

2.5.2 रामायणाश्रित-रूपकाणि ----------25

7- प्रतिमा नाटकम् ---------------25

8- अभिषेकनाटकम् --------------25

2.5.3 पुराणाश्रित-रूपकम् --------------26

9- बालचरितम् ------------------26

2.5.4 वृहत्कथाश्रित-रूपके -------------26

10- प्रतिज्ञायौगन्धरायणम् ------26

11- स्वप्नवासवदत्तम् -----------26

2.5.5 स्वकल्पित-कथाश्रित-रूपके ------27

12- अविमारकम्---------------27

13- चारुदत्तम् ----------------27

2.6 अश्वघोषः ----------------------28

2.6.1 महाकाव्यम् ------------------28

1- बुद्धचरितम् ---------------28

2- सौन्दरनन्दम् -------------29

2.6.2 प्रकरणम् --------------------29

3- शारीपुत्तप्रकरणम् --------29

2.7 भारविः -----------------------29

2.8 माघः ------------------------30

2.9 श्रीहर्षः----------------------31

2.10 गद्यकाव्यम् -----------------32

2.10.1 दण्डी --------------------33

2.10.2वाणभट्टः ------------------33

2.11 चम्पूकाव्यम् ----------------34

2.12 गीतिकाव्यम् -----------------34

2.12.1 जयदेवः ------------------34

2.13 नाट्यकाराः---------------------

2.13.1 भवभूतिः ------------------34

2.13.2 शूद्रकः --------------------35

2.13.3 विशाखादत्तः --------------35

## 2.1 पठनस्य उद्देश्यः

1 -Types of literary works in Sanskrit……

2 -the difference between POETRY ,PROSE and DRAMA……..

3 -Kalidasa as a poet and dramatist…….

4 -Poets like Bharavi,Magha, Jayadeva,Banabhatta ,Bhavabhuti and others………



ज्ञातमिदं सर्वैःयत् दृश्यश्रव्यत्वेन काव्यं द्विवधम् । काव्यं किम् ? कवेरिदम् यञ्।कव-वर्णने स्तुतौ च कर्मणि ण्यत् ।कविः किम् ? कवयस्तु क्रान्तदर्शिनः।सर्वज्ञत्वात् सः कविः ।

## 2.2 दृश्यकाव्यं

दृश्यमभिनेयम्। रूपकमिति प्रसिद्धम् । तत्र रूपकाणि दशविधानि ।

**रूपकम्** –

- 1-नाटकम्
- 2-प्रकरणम्
- 3-भाणः
- 4-व्यायोगः
- 5-समवकारः
- 6-डिमः
- 7-ईहामृगः
- 8-अङ्कः
- 9-वीथी
- 10-प्रहसनम् इति।

**उपरूपकम्**

उपरूपकाणामपि अष्टादश भेदाः सन्ति । यथा –

- 1-नाटिका

- 2-त्रोटकम्
- 3-गोष्ठी
- 4-सट्टकम्
- 5-नाट्यरासकम्
- 6-प्रस्थानम्
- 7-उल्लाप्यम्
- 8-काव्यम्
- 9-प्रेङ्खणम्
- 10- रासकम्
- 11-संलापकम्
- 12-श्रीगदितम्
- 13-शिल्पकम्
- 14-विलासिका
- 15-दुर्मल्लिका
- 16-प्रकरणी
- 17-हल्लीशः
- 18-भाणिका इति ।

संस्कृतसाहित्ये यानि रूपकाणि सुप्रसिद्धानि तानि केवलमत्र आलोचितानि ।

## 2.3 श्रव्यकाव्यम्

'श्रव्यं श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा' । पद्यं किम्? 'छन्दोबद्धं पद्यम्'।महाकाव्यं खण्डकाव्यञ्च श्रव्यकाव्येषु प्रमुखम् । गद्यं किम्?'वृत्तगन्धोज्झितं गद्यम्'।गद्यकाव्यं द्विधा विभज्यते। कथा आख्यायिका च । 'गद्यपद्यमयं काव्यंचम्पूरित्यभिधीयते'। गद्यपद्यमयत्वादेतत् मिश्रकाव्यम्उभयात्मकं भवति । यत्र उभयशैल्यांराज्ञः स्तुतिः क्रियते तत् विरुदमित्युच्यते ।करम्भकं तु एकाधिकभाषायाम् विरचितं काव्यमस्ति । यथा विश्वनाथकविराजमहोदयेन विरचिता 'प्रशस्तिरत्नावली' । काव्यमिदं षोडशभाषायां विरचितमिति मिश्रकाव्यरूपेण गृहीतं भवति। समस्तानां काव्यानां सविस्तरं विवरणं नात्र प्रदत्तम् । पाठ्यक्रमस्य आवश्यकतानुसारं विशेषाणां कवीनां केवलमालोचनं कृतम् ।

## 2.4 कालिदासः

संस्कृतसाहित्ये सर्वाधिकमान्यताप्राप्तः कविः कालिदासः न केवलं स्वदेशे अपितु विदेशे अपि परिचितः भवति ।तस्य जन्मादिवृत्तान्तं अद्यापि दुर्ल्लभमस्ति।विक्रमोपाधिविशिष्टराज्ञः नामोल्लेखेन सः उज्जयिनीनगरे खीष्टपूर्वप्रथमशतके आविर्भूतासीदिति मन्यते ।

### 2.4.1 तस्य कृत्तयः

1 कुमारसम्भवम्–

एतत् सप्तदश-सर्ग-विशिष्ट-महाकाव्यम् ।अष्टसर्गेषु हिमालयपर्वतस्य माहात्म्यं वर्णयित्वा शिवस्य विवाहवर्णनं कृतम् ।शेष-नवसर्गेषु कार्त्तिकेयस्य जन्मवृत्तान्तं रूपायितं भवति । अत्र मुख्यचरित्रे शिवः पार्वती च ।तारकासुरस्य विनाशाय कुमारस्य कार्त्तिकेयस्य जन्म भवेदिति इन्द्रादिभिः चिन्तितम् । ततः शिवपार्वतीपरिणयं कर्तुं चेष्टितवन्तः । अनेन कन्दर्पः भस्मीभूतोऽभवत् । महादेवस्य तृतीयनेत्रस्य अग्निना दग्धीभूतं कामदेवं दृष्ट्वा पार्वती

भग्नमनोरथा जाता। तत् पश्चात् सा तपस्कृत्वा शिवं प्राप्तवती । काव्येऽस्मिन् पार्वती अपर्णा इति नामिता । तपश्चरणस्य पराकाष्ठा उदाहृता अत्र ।

2 रघुवंशम्–

उनविंशसर्गेषु रघुकुलस्य महनीयतां प्रतिपादयति कविरत्र । प्रथमे श्लोके वागर्थरूप-पार्वतीपरमेश्वरौ नमस्कृत्यदीलिपादारभ्यः लवकुशौ-अग्निवर्ण-यावत् सर्वेषां रघुकुलजानां यथायथं वर्णनं कृतम् ।तात्कालीक-भौगलिक-अवस्थितेः,शासननीतेः,दिग्विजय-युद्धादीनाञ्च अविकलं चित्रमुपस्थापितं महाकविना कालिदासेन। हिमालयस्यआश्रमस्य,बिन्ध्याचलस्य,समुद्रतटस्य,नारिकेल-पूगादि -वृक्षाणां च वर्णने कवेः नैपुण्यं परिलक्ष्यते ।अस्मिन् महाकाव्ये दाक्षिणात्य-युद्धयात्रा-प्रसङ्गे उड्रदेशस्यापि उल्लेखः प्राप्यते।क्षुद्र-उडुपेन विपुल-पारावारस्य अतिक्रमणं यथा दुष्करं भवति तथैव महान्-रघुवंशस्य वर्णने उडुप-सदृश-कवि आत्मानमक्षमेति मन्यते ।

3 **अभिज्ञानशाकुन्तलं नाटकम्** –

ख्यातवृत्तमाश्रित्य कोऽपि प्रख्यातवंशीयः राजर्षिः नाटकस्य नायकः भवेत्। सः प्रतापवान् अपिच दिव्यादिव्यगुणैः सम्पन्नः स्यात् ।श्रृङ्गारः बीररसो वा अङ्गीरसः भवेत्। अस्मिन् पञ्चसन्धयः,अभ्युदयात्मक-नायकोचित-गुणाः,नाना-अङ्गरसाः सम्मिलिताः सन्ति ।पञ्चतः दशाङ्काः वर्त्तेत । नाटकं गोपुच्छाग्रमिव समापयेत् ।

अभिज्ञानेन ज्ञाता शकुन्तला,तदधिकृत्य कृतं नाटकम् अभिज्ञानशाकुन्तलम्।नाटकेऽस्मिन् शकुन्तला नायिका,दुष्यन्तश्च नायकः। माधव्यनाम विदूषकः राज्ञः सखा,नर्मसहायकश्च भवति। प्रियम्वदा-अनसूया-गौतमी-शार्ङ्गरव-शारद्वत-सानुमती-कैवर्त्त-मातल्यादि-चरित्राणि कालिदासस्य कल्पनाप्रसूतानि पात्राणि।अत्र अभिज्ञानं दुष्यन्तनामाङ्किता एका मुद्रिका।

मुद्रिकादर्शनेन हि दुष्यन्तस्य दुर्वासा-अभिशाप-जनित-विस्मरणं समाप्तं जातम् ।महाभारतीय-शाकुन्तलोपाख्यानस्य अवलम्बनेन नाटकमिदं विरचितम्।परन्तु गजप्रवेश-दुर्वाससः शाप-धनमित्रोपाख्यान-मातलिप्रवेशादयस्तथा सर्वोपरि कण्वमुनेरनुपस्थितिः कालिदासस्य एव अभिनवा कल्पना। सप्त-अङ्क-विशिष्ट-नाटके श्रृङ्गार एव अङ्गीरसः।सप्तमाङ्के अद्भूतरसप्रदर्शनाय अन्तरीक्षे आकाशे स्वर्गे मारीच-आश्रमे च रथस्य गमनदृश्यमुपस्थाप्यते। दुष्यन्तः धीरोदात्तनायकः। शकुन्तला मुग्धानायिका ।अस्य प्रस्तावनायां नान्दीश्लोके शिवस्य अष्टमूर्त्तयः परिकल्पिताः । नाटकेषु एतत् सर्वश्रेष्ठं काव्यम्। उक्तञ्च –

‘काव्येषु नाटकं रम्यम् तत्र रम्या शकुन्तला’

भारतीय-संस्कृतेः प्रकृष्टमुदाहरणमेतद् नाटकमिति सर्वैः स्वीकृतम् ।

4 विक्रमोर्वशीयम् त्रोटकम् –

उपरूपकेषु त्रोटकं व्यवहृत्य कालिदासेन विक्रमोर्वशीयं रचितम्।त्रोटकस्य वैशिष्ट्यमिदं यत् विदूषकः प्रत्येके अङ्के समायाति।तथा अस्मिन् सप्त अष्ट नव पञ्च वा अङ्काः सन्ति। विक्रमोर्वशीये पञ्चाङ्काः वर्त्तन्ते। प्रत्येकेऽङ्के विदूषकस्य समावेशेन श्रृङ्गाररसः प्रमुखः भवति । उपरूपकेऽस्मिन् नायिका अप्सरा उर्वशी इन्द्रस्य अभिशापेन मर्त्त्यलोकमागत्य मानवलोकस्य विक्रमनामा राज्ञा सह विवाहमकरोत् । विक्रमस्य स्वपुत्रदर्शनेन अभिशापात् मुक्ता उर्वशी अन्तर्हिता जाता । इन्द्रलोकं प्रति प्रत्यावर्त्तनकाले सा पुनः शापिता । विक्रमराजा तामन्विष्यन् स्वर्गं गत्वा लतायां परिवर्त्तितामुर्वशीं प्राप्तवान्। इन्द्रस्य अनुमतिं लब्ध्वा सा राज्ञा सह मर्त्यलोकेचिरमतिष्ठत्।ऋग्वेदस्य पुरुरवा-उर्वशी-संवाद-सूक्तस्य आधारेण रचितमिदं त्रोटकम् । अत्रापि कालिदासः अभिज्ञानशाकुन्तलमिव कथावस्तुनि बहुपरिवर्त्तनं कृतवान्।

## 5 मालविकाग्निमित्रम् नाटकम्–

नाटकेऽस्मिन्पञ्चाङ्काः सन्ति। विदर्भराजकुमारी-मालविका नायिका,विदिशाधिपति-अग्निमित्रः नायकश्च। अन्यरूपकद्वयमिव कविप्रौढत्वस्य अभावाद्एतत् कालिदासस्य प्रारम्भिकी रचनेति विचार्यते। परन्तु कालिदासस्य आविर्भावकालनिरूपणप्रसङ्गे नाटकमिदं विशेषमस्ति। पुष्यमित्र-अग्निमित्रयोः दिग्विजयवर्णनया तथा प्रस्तावनायां भासस्य नामोल्लेखनेन तस्यकालं निरूप्यते।

## 6 मेघदूतम् खण्डकाव्यम् (गीतिकाव्यम्)–

खण्डकाव्यमिदं कालिदासस्य विद्वत्तां प्रतिष्ठापयति। कलेवरदृष्ट्या महाकाव्यात् क्षुद्रमपि मेघदूतं खण्डकाव्यं संस्कृतसाहित्यवाङ्मये शीर्षत्वं लभते। पूर्वमेघे उत्तरमेघे चतदानीन्तन-भारतभूखण्डस्य भौगलिकचित्रं प्रदत्तमस्ति। स्वल्पाधिक-शत-श्लोकैः नदी-पर्वत-वन-पत्र-पुष्प-फल-औषधि-पशु-पक्षी-स्थूलसूक्ष्मप्रकृति-मानवीयानुभूति-परस्परैः सह सम्पर्क-उपाख्यानानाञ्च उल्लेखः वैशद्येन स्वल्पातिस्वल्पशब्दैरुपस्थापितम्। अत्र यक्षः आलम्बनविभावः,मेघश्च उद्दीपनविभावः.। शापेन दण्डितः सन् एकवर्षं यावत् पत्नीविरहितः यक्षः बिन्ध्यपर्वते विचरति, पुनराषाढस्य प्रथमदिवसेआकाशे मेघं दृष्ट्वा संदेशं प्रेरयति। प्रणयीहृदया यक्षिणी उत्तरदिशि अलकापुर्य्यां निवसति। धूम-ज्योतिः-सलिल-मरुतां सन्निपातेन रचितःमेघः निर्जीवः। तस्य संदेशहरणयोग्यता नास्ति। तथापि कविः मेघं संदेशवाहकरूपेण उपस्थापयति। अपरञ्च यक्षस्य नामापि नोच्चारयति। कश्चित् कामार्त्तो अभिशप्तः गन्धर्वः वर्षाकालीनं घनं दृष्ट्वा स्वावेगं प्रकाशयति। विप्रलम्भ-शृङ्गारः गीतिकाव्यस्यास्य अङ्गीरसः। एतत् कथावस्तु पूर्णतया कविकल्पितम्।अपिच उज्जयिन्याः विशेषवर्णनयाकवेरुज्जयिनीप्रीतिः प्रमाणिता। दक्षिणतः उतरदिशं प्रति गच्छतः मौसुमीप्रवाहस्य मार्गे उज्जयिनीनगरी नायाति। अतः तीर्यक् गतिं प्राप्य मेघः उज्जयिनीं गच्छेदिति सूचितम्।निदाघग्रीष्मः यदा समग्रां धरीत्रीं पीडयति तदा मेघः सन्तप्तानां

कृतेशरणदायी भवति।कृषिकार्येऽपि सहायतां करोति। जीवनधारणाय मेघ एव एक सहायकः। सः यक्षः भवेत् न वा ।

7 **<u>ऋतुसंहारम् गीतिकाव्यम् –</u>**

षण्णां ऋतूनां वर्णना प्राप्यतेऽस्मिन् खण्डकाव्ये।एतद् कालिदासेन विरचितं न वेति शङ्का विद्यते। ऋतूनां वर्णनायामपि श्रृङ्गारस्य प्रभावः परिलक्षते। प्रकृतेः रूपवैचित्र्यं कीदृशं रमणीयं तत् प्रदर्शितम्। षट्-सर्गेषु ग्रीष्म-वर्षा-शरद्-हेमन्त-शीत-वसन्तादिऋतूनां वर्णने कालिदासोपम-कवि-नैपुण्यं न परिलक्ष्यते।

कालिदासः श्रृङ्गारी कविः। तथापि तस्य कृत्तिषु उदात्तभावस्य प्रभावः दरीदृश्यते। प्रेयसः श्रेयान् श्रेष्ठः। सर्वेषु ग्रन्थेषु पार्थिवसुखं न्यूनं कृत्वा स्वर्गीयसुखस्योपरि प्राधान्यं ददाति। पश्चातापेन तपश्चरणेन च आत्मशुद्धिर्जायते। शकुन्तला-दुष्यन्त-उर्वशी-विक्रम-पार्वती-सुदक्षिणा-दिल्लीप-यक्षादिचरित्राणि इदं प्रमाणीकुर्वन्ति। काव्यशैल्यां वैदर्भीरीतिः प्रसादगुणश्च तस्य प्रियः भवति। उपमालङ्कारस्य प्रयोगे सः निपुणो भवति।अतः कथ्यते 'उपमा कालिदासस्य'। तस्य उपमालङ्कारे उपमेय-उपमान-औपम्यवाचकशब्द-सामान्यधर्मादिचतुर्णाम् स्पष्टरूपेण प्रयोगः क्रियते। सः प्रकृतिकविरिति ख्यातः।अन्तर्प्रकृति-वहिर्प्रकृत्योः रूपायने तस्य तुलना नास्ति।

---

## 2.5 भासः

---

महाकविः भासः संस्कृतरूपकाणां जनकेति{Father of Indian Drama} प्रसिद्धिं लभते।कालिदासेन मालविकाग्निमित्रनाटकस्य प्रस्तावनायां लिखितमस्ति-'प्रथितयशसां भास-सौमिल्ल-कविपुत्रादीनां प्रबन्धानतिक्रम्य कथं वर्त्तमानस्य कवेः कालिदासस्य कृतौ बहुमानः'।अस्मादनुमीयते भासः कालिदासस्य पूर्ववर्त्तीकविरिति। तस्य आविर्भावः द्वितीयशतक-ई.पूर्व-काले भवेत्। परन्तु तस्य काव्यानि विंशशताब्दीं यावत् प्रकाशितं

नासीत्। 1912 खीष्टाव्देT.Ganapati Shastri महोदयः त्रयोदशरूपकाणां एककर्त्तृत्वं प्रमाणीकृत्य भासकाव्यान् भासनाटकचक्रं नाम्ना प्रकाशितवान्।1906खीष्टाव्दतः 1912 पर्यन्तं केरल-माद्रास-मैसुरप्रदेशेषु भासकाव्यानां पाण्डुलिपि-संग्रहः देवनागरीलिप्यां पाठोद्धारश्च कृतम् । कविः जयदेवः प्रसन्नराघवे 'भासो हासः' इति अलिखत्। अतः हास्यरसपरिवेषणे सः निपुणो आसीदिति तर्क्यते।

**भासनाटकचक्रम्**

महाभारत-रामायण-वृहत्कथा-आधारेण भासः स्वरूपकाणि रचितवान्।

### 2.5.1 महाभारताश्रितरूपकाणि

1- **<u>दूतवाक्यम् –</u>**

हस्तिनापुर्यां श्रीकृष्णस्य दौत्यकर्मणा दुर्योधनस्य प्रतिक्रिया वर्ण्यतेऽत्र। यदा दुर्योधनः 'दारनिस्पृहः परात्मजानां पितृतां कथं ब्रजेत्'इत्युक्त्वा पण्डूं निन्दति तदा दूतवेषी श्रीकृष्णः 'व्यासेन जातो धृतराष्ट्र एष' उक्त्वा दायाद्यस्योपरिप्रश्नमुपस्थापयति। वीररसपूर्ण-रूपकमिदं व्यायोगस्य भेदे आयाति।

2- **<u>कर्णभारम् –</u>**

कर्णस्य कवच-कुण्डल-दानं तथा परशुराम-प्रसङ्गे अत्यधिकधैर्यं समाहृत्य मूल-महाभारतीय-कथावस्तुनः प्रयोगः कृतः। आवश्यकतानुसारं परिवर्तनं कृत्वा नाटकीयतांसृजति भासः।वीररसः मुख्यः भवति। परन्तु कर्णस्य मनोव्यथां प्रकाशयितुं करुणरसं संयोजयति। कर्णः कथयति -सर्वं क्षयं याति। केवलं हुतं दत्तञ्च तथैव तिष्ठति। पुरुषेण एव धर्मः यत्नैः साध्यः भवेत्।

## 3- दूतघटोत्कचम् –

अत्र हिडिम्बा-पुत्र-घटोत्कचःनायकः। रूपकमिदंव्यायोग उत्सृष्टिकाङ्कः वेति वैमत्यमस्ति। अभिमन्यु-मरणोपरान्त-कथावस्तु समुपस्थास्यतेऽत्र।गान्धारी कुलनाशस्य समयोपस्थितमिति सूचयति।धृतराष्ट्रोऽपि शकुनिं भर्त्सयन्पुत्रनाश-दुःखमनुभवति।तदा धर्मं समाचरितुंश्रिकृष्णः भीमपुत्रं प्रेरयति। घटोत्कचः दूतरूपेण धृतराष्ट्रं विज्ञापयति यद् एकस्य पुत्रस्यनिधने यदि तादृशं दुःखं प्राप्तं तर्हि शतपुत्राणां मरणेन किं भवेत्। एतदेव उक्त्वा सः दौत्यं सम्पादयति।रूपकेऽस्मिन् भरतवाक्यं न वर्त्तते। अतः रूपकमिदमसमाप्तमिति विचारयन्ति समालोचकाः।

## 4- मध्यमव्यायोगः –

नामतः ज्ञायते एतद् व्यायोगः। व्यायोगे एकाङ्कः विद्यते। स्वल्प-स्त्री-पात्राणां बहु-पुरुषपात्राणां तथा ख्यात-धीरोद्धत-नायकस्य प्रयोगः कुर्यात्। हास्य-श्रृङ्गार-शान्तरसा अङ्गीरसरूपेण न व्यवह्रीयेत। मध्यमशब्देन भीम इति ज्ञायते।कुन्तीपुत्राणां भीमः मध्यमपुत्रः भवति। ब्राह्मण-केशवदासः सपरिवारं उपनयनोत्सवे योगदानं कर्त्तुं बन्धुगृहं गच्छन् राक्षस-घटोत्कचं पश्यति।घटोत्कच अकार्य्यमिति ज्ञात्वा अपि मातुराज्ञया तान् मारितुमुद्यते सति ते अहं-अहमितिउच्चारयन्तः मर्त्तुमागताः। अन्ततः विप्रस्य मध्यमपुत्रः सर्वसम्मतिक्रमेण आहाररूपेण स्वीकृतः। मध्यम मध्यमेति यदा घटोत्कचः तं आह्वयति तदा मध्यम-पाण्डव-भीम तत्र आगच्छति। इत्थं पितापुत्रमिलनं भवति। ब्राह्मणोऽपि सपरिवारं सुरक्षितः सन् बन्धुग्रामं गच्छति।

## 5- पञ्चरात्रम् –

काव्यमिदं समवकारभेदे आयाति। समवकारे त्रयाङ्काःभवेयुः। विमर्शसन्धेः प्रयोगः न क्रियते। द्वादश-संख्यक-धीरोदात्त-नायकाःदेवाः मानवाः वा भवेयुः। वैदिकछन्दसां व्यवहारोऽपि क्रियेत। विशेषमिदं यत् अस्मिन् विषयवस्तुनः व्यापकता अपि नियन्त्रिता भवति। यथा प्रथमाङ्कस्य कथा द्वादश-नालीभिः द्वितीयाङ्कस्य चतसृभिः नालीभिः तृतीयाङ्कस्य द्वाभ्यां नालीभ्यां निष्पादनीया।{घटिकाद्वयम् = एका नालीका}।

समवकारेऽस्मिन् दुर्योधनः मुख्यनायकः। गुरुदक्षिणाप्रदानार्थंदुर्योधनेन द्रोणाचार्यः अनुरुध्यते। उत्तरेण द्रोणः पाण्डवानां कृते भूमिं याचते। तच्छ्रुत्वा दुर्योधनः शर्त्तमूलक-दान-प्रदानाय सम्मतिं ददाति। दानस्य विनिमयेन पाण्डवाः पञ्चरात्रिं यावत् अज्ञातवासे तिष्ठेयुः। पाण्डवाश्च विराट्नगर्य्यां अज्ञातरूपेण स्थिताः। गोधनहरणोपरान्तं युद्धे पाण्डवानां परिचयः कौरवैः प्राप्तः। तत्रैव द्रोणः सोपाधिक-स्वयाचना-पूरणाय दुर्योधनं कथयति। दुर्योधनः गुरुदक्षिणां प्रयच्छति। रूपके समवकार-लक्षणानुसारं दुर्योधनस्य उदात्तत्वं द्रोणस्य शिष्यवत्सलत्वञ्च युज्यते।

## 6- उरुभङ्गम् –

महाभारतयुद्धस्य अन्तिमपर्याये दुर्योधनं विहाय सर्वे कौरव-भ्रातरः मृताः जाताः। दुर्योधनःभीमेन सह गदायुद्धं करोति। श्रीकृष्णस्य इङ्गितेन भीमः उरौ गदाप्रहारं कृत्वा दुर्योधनं हन्ति। बलरामस्य सहायतां न नीत्वापि सः सन्तोषं लभते। यतः बलहीन इति न ,भीमस्य छलेन कृष्णस्य कूटनीतिना सः पराजितो भवति। पत्नीपौरवीं पित्रोः पुत्रादीनां च दायित्वनिर्वाहार्थं उपदिशति। क्रुद्ध-क्षुब्धश्च अश्वत्थामा दुर्योधनपुत्र-दुर्जयस्य राज्याभिषेकं कारयति।काव्यस्यान्ते दुर्योधनःपञ्चत्वं प्राप्नोति।

नाट्यशास्त्रप्रणेता-भरतमुनिनारङ्गमञ्चोपरि मृत्युः न प्रदर्शितव्य इति स्पष्टमुद्घोषितम्। अत्र तस्य व्यतिक्रमः परिलक्षते। अन्यत्च्च दुर्योधनः उदात्तचरित्र-रूपेण चित्रितः। न तु अभिमानी-क्रूर-उद्धत-पुरुषरूपेण यथा महाभारते वर्णितमस्ति।

एतानि सर्वाणि महाभारताश्रितानि रूपकाणि सन्ति।

### 2.5.2 रामायणाश्रित-रूपकाणि

**7- <u>प्रतिमा नाटकम् –</u>**

रामायणीकथामाश्रित्य रचितं रूपकमिदम्। राजकुमार-रामस्य राज्याभिषेकादारभ्यते काव्यम्।लङ्कायुद्धे रावण-पराजयोपरान्तंअयोध्यां प्रत्यावर्त्य पुनः राजारूपेण अभिषिक्त आसीत्।एषाकथा उपस्थापिताऽत्र। नाटकीयतां समासादितुं यत्र तत्र परिवर्त्तनानि कृतम्। नाटकस्य आकर्षणं भवति प्रतिमागृहः यत्र मृतपूर्वजानां प्रतिमाः सज्जिताः सन्ति। तत्र दशरथस्य प्रतिमां दृष्ट्वा भरतः सर्ववृत्तान्तं जानाति। पश्चात् कौशल्यां क्षमां याचते। स्वमातरं कैकयीं भर्त्सयति च। सप्ताङ्कविशिष्टनाटकमिदम्।

**8- <u>अभिषेकनाटकम् –</u>**

एतदपि रामकथाश्रितनाटकं भवति। रामायणस्य किष्किन्ध्याकाण्डादारभ्य लङ्काकाण्डं यावत् कथां षडङ्केषु संयोज्य भासः सुग्रीवस्य श्रीरामस्य च अभिषेकं कारयति। रामायणमिव नात्र लङ्कासेतुः वानरैः निर्मितम्। वरुणदेवः स्वयं जले मार्गं प्रदत्तवान्। निर्वहणे अद्भूतरसस्य अवतारणाय रामं नारायणेति नाम्ना स्तूयन्ते। तत्र दिवंगतः दशरथोऽपि उपस्थितासीत्।

### 2.5.3 पुराणाश्रित-रूपकम्

9- **<u>बालचरितम् –</u>**

कृष्णस्य बाल्यलीला यथा श्रीमद्भागवत-महाभारतहरिवंश-पुराणादिषु वर्णिता तदेव पञ्चाङ्केषु योजयन् बालचरिते उपस्थापिता। कृष्णजन्मादारभ्य कंसमरणं यावत् वृत्तान्तं नाटके परिवेषितम्। बालकोऽपि कृष्णः नाटकस्य नायकः। लौकिक-अलौकिक-गुणोपेत-धीरोदात्त-नायकः बालकृष्णः।अत्र मुख्यरसः वीर एव। अस्मिन् शृङ्गाररसस्य प्रयोगः न कृतः। ख्यातवृत्तमपि भासस्य कविप्रतिभा-वर्णनाचातुरी-सरलभाषाः च नाटकीयता-परिस्फुटने सहायतां कुर्वन्ति। येन संस्कृतरूपकेषु बालचरितम् सुपरिचितमस्ति।

### 2.5.4 वृहत्कथाश्रित-रूपके

10- **<u>प्रतिज्ञायौगन्धरायणम् –</u>**

उदयन-वासवदत्ता-कथा लोककथारूपेण सुप्रसिद्धा। एषा गुणाढ्यस्य वृहत्कथायामपि विद्यते। मेघदूतेऽपि कालिदासः उदयनकथाया उल्लेखं करोति।वत्सराज-उदयनः उज्जयिनी-राजकुमारी-वासवदत्ताम् अपहृत्य विवाहमकरोत्। मन्त्री यौगन्धरायणः रुमण्वता सह मन्त्रणां कृत्वा राज्ञः सहायतां करोति।यतः वीणावादनेन छद्म-गजं वशीकर्तुं उद्यत-उदयनः स्वयं प्रद्योतस्य वन्दी भूत्वा कारागारे निक्षिप्तः। चतुर्भिरङ्कैः संयोजितमिदं रूपकम्। यौगन्धरायणस्य प्रतिज्ञा काव्यस्यास्य वीजं भवति।

11- **<u>स्वप्नवासवदत्तम् –</u>**

नाटकमिदं भासस्य श्रेष्ठा कृतिः। षड्भिरङ्कै उदयनकथामाश्रित्य भासः मगधराजकन्या-पद्मावतीं नायिकारूपेण उपस्थापयति। प्रतिज्ञायौगन्धरायणे वासवदत्ता-उदयनयोः प्रणय-परिणयः वर्णितः। स्वप्नवासवदत्तंनाटके वासवदत्ता स्वयं पद्मावती-उदयनयोःविवाहं कारयति। प्राक्राजा-प्रद्योतस्य कन्यां वासवदत्तां परिणीय उज्जयिन्याः, पश्चात् पद्मावतीं परिणीय

मगधस्य मित्रराज्यं भवति वत्सराज्यम्। सम्यगुक्तं भासेन –‘ चक्रारपंक्तिरिव गच्छति भाग्यपङ्क्तिः’। उदयन-मुखेन कथयति च –‘पञ्चेषुर्मदनः यदा कथमयं षष्ठशरः पातितः’। आरुणिं विजित्य उदयनः स्वराज्ये पुनरधिष्ठितो सन् निर्वैरं तिष्ठति। एतदेव परिणमयितुं मन्त्री रुमण्वान् यौगन्धरायणश्च योजनां कुरुतः। नाटकस्य नामकरणस्य सार्थकतां प्रतिपादयितुं पञ्चमाङ्के स्वप्नस्य प्रयोगः कृतास्ति।

### 2.5.5 स्वकल्पित-कथाश्रित-रूपके

12- <u>अविमारकम्-</u>

षडङ्क-विशिष्टं नाटकं भासस्य कल्पनाप्रसूतमिति सुनिश्चितम्। एतद् प्रकरणमित्यपि समालोचकैः विचार्यते।अविमारकः धीरललितः नायकः। परन्तु प्रकरणस्य लक्षणानुसारं सः न विप्रः न वणिक् नापि अमात्यः भवति। सौवीर-राजकुमार-अविमारकः काशीराज-पत्नी-सुदर्शनायाः तथा अग्निदेवस्य पुत्रोऽस्ति। बाल्यकाल एव अवि-रूपी-राक्षसस्य बधं कृत्वा अविमारक-नाम्ना परिचित आसीत्। तस्य प्रकृतनाम विष्णुसेनः।कुन्तीभोजस्य कन्या कुरङ्गी नायिका च। श्रृङ्गार अत्र अङ्गीरसः। नाटकीयता एव रूपकस्यास्य वैशिष्ट्यम्।

13- **चारुदत्तम् –**

एतदपि कवेः स्वकल्पितं कथावस्तु। अत्र वणिक्-ब्राह्मण-चारुदत्तः नायकः। नायिका च गणिका वसन्तसेना। वसन्तसेनयाअलङ्कारन्यास एव कारणं भवति नायिका-नायकयोः मिलनस्य। वसन्तसेना शकारात् भीत्वा चारुदत्तं अलङ्काराणि प्रयच्छति। तृतीयाङ्के सज्जलकः चारुदत्तस्य गृहे प्रविश्य तानेव आभूषणान् चोरयति। चतुर्थाङ्के आभरणानां विनिमयेन मदनिकां दासमुक्तां कर्त्तुम् सज्जलकः वसन्तसेनां प्रार्थयति।सा स्वपरिचारिका-मदनिकां दासत्वभावात् मोचयति। तैरेवालङ्कारैः विभूषिता भूत्वाचारुदत्तस्य गृहं गन्तुमुद्यते वसन्तसेना। तदा दुर्दिनं जातमिति चेटी सूचयति। अभिसरणे दुर्दिनस्य हेतोः बाधा

जाता।नाटकस्य कथावस्तु असम्पूर्णमिव प्रतीयते। अत्र द्यूतक्रीडायारुल्लेखोऽपि वर्त्ततेति संवाहक-चरित्रेण ज्ञायते। विदूषकः चारुदत्तस्य दारिद्र्येऽपितेन सह वसति।भासः यज्ञफलम् नाम नाटकस्यापि रचयिता इति समालोचकाः तर्कयन्ति। अभिनयदृष्ट्या भासस्य समस्तरुपकाणि आदर्शस्थानीयानि। मञ्चोपयोगी-रूपकाणांरचनायां सः सिद्धहस्तः। सरलसंस्कृतभाषा-संलापोपस्थापनशैली-नाटकीयता-तथा-सामाजिकैः सह भावानुबन्धनदृष्ट्या भासनाटकचक्रं समर्थमेव।

## 2.6 अश्वघोषः

सुवर्णाक्षीपुत्र-अश्वघोषः बुद्धस्य चरितमाश्रित्य द्वे महाकाव्ये एकं प्रकरणंच लिखितवान्। सः साकेतदेशवासीति स्वरचितग्रन्थे स्वयमेव अलिखत्। अयोध्यायां (80 AD) जन्म लब्ध्वा (150AD) पेशावर्(पाकिस्तान्)प्रान्ते दिवंगतः।(Wikipedia)। सः कनिष्कस्य सभाकविपदमलङ्कृतवान्। कुषाणराजा कनिष्कः प्रथमशतक-ख्रीष्टाव्दे 78 वर्षे शकाव्दं प्रचलितवानितिऐतिहासिकैरुल्लिखितमस्ति। एतदनुसारम् अश्वघोषस्य समयःप्रथमशतक एव भवेत्। काव्यशैलीदृष्ट्याकालिदास-अश्वघोषयोः तुलना क्रियते। द्वयोः पौर्वापौर्यमपि आलोच्यते। स्वस्य ग्रन्थे आत्मानं महाकविः आचार्यः भिक्षु इति च उच्चारयति। अस्मादिदं ज्ञायते सः बौद्धभिक्षुरासीदिति।

### 2.6.1 महाकाव्यम्

1- **बुद्धचरितम् –**

अष्टविंशति-सर्गैः विरचितमिदं महाकाव्यम्। परन्तु अधुना काव्यस्य कियदंशमेव प्राप्यते। शेषार्द्धस्य सप्तदशसर्गाः उपलब्धा सन्ति। माया-शुद्धोदनयोः पुत्रः सर्वार्थसिद्धः पत्नी-यशोधारां पुत्र-राहुलं च परित्यज्य समाधिस्थः सन् बुद्धत्वं लभते। निर्वाणं प्राप्य बौद्धधर्मं

प्रतिष्ठापयति। लुम्बिनी-वने जन्मग्रहणादारभ्य निर्वाणप्राप्तिपर्यन्तं इतिवृत्तमस्य काव्यस्य कथावस्तु।

2- **<u>सौन्दरनन्दम् –</u>**

सुन्दरी तथा नन्दः महाकाव्यस्य नायिका नायकश्च। बुद्धस्य विमातुः पुत्रः नन्दः कामेन पीडितः सन् शिष्यत्वं न गृह्णाति। पश्चात् बुद्धः तस्य मुण्डनं कारयित्वा भिक्षुरिति उद्घोषयति।अनेन अपि नन्दस्य कामासक्तिः न त्यक्ता। हिमालयं गत्वा नन्दस्य मनसि बुद्धः वैराग्यं जनयति। मर्कटी-अप्सरसोः दृष्टान्तेन सुन्दरीं प्रति तस्य अहेतुकासक्तिः समाप्ता जाता। आध्यात्मिकज्ञानं लब्ध्वा भिक्षुरूपेण धर्मस्य प्रचारमकरोत्।काव्येऽस्मिन् अष्टादश सर्गाः विद्यन्ते।

### 2.6.2 प्रकरणम्

3- **<u>शारीपुत्तप्रकरणम् –</u>**

एतद् रूपकस्य प्रकरणभेदे आयाति। पालिभाषायां 'पुत्रः''पुत्त' इति उच्चार्यते।शारी माता भवति । शारीपुत्रः कथं बुद्धस्य शिष्यत्वं स्वीकरोति तदेव अस्य प्रकरणस्य कथावस्तु।अस्मिन् नव अङ्काः सन्ति। एतद् व्यतिरिक्तम् अश्वघोषस्य अन्यानि अपि काव्यानि सन्ति। यथा -सूत्रालङ्कार-वज्रसूची-महायानादयः। सर्वे ग्रन्थाः बुद्धस्योपरि आधारिताः सन्ति। सः न केवलं कवि अपितु दार्शनिकः भवति।

---

## 2.7 भारविः

---

भारविः अष्टादश-सर्गेषु किरातार्जुनीयं महाकाव्यं रचितवान्। किरातवेषेण आविर्भूय स्वयं शिवः वन्यशूकरः गण्डारो वा केन मारित इति अर्जुनं स्पर्द्धते। अर्जुनः पाशुपत-अस्त्र-प्राप्त्यर्थं तपश्चरणमकरोत्। शिवः तं परीक्षितुं तत्रागत्य युद्धम् उद्घोषयति।नायक अर्जुनः परीक्षायां

उत्तीर्णो भूत्वा दिव्य-पाशुपतास्त्रं लभते। पाण्डवानाम्  अरण्यवासकाले दुर्योधनः सुशासनं कृत्वा सुयोधन इति नाम्ना विदितोऽस्ति। तदेव ज्ञापयितुं वनेचरः युधिष्ठिरं निकषा गच्छति। तत्र द्रौपद्याः क्रोधपूर्णमुद्गारःकवेः कवित्वं प्रमाणीकरोति। भारविः अर्थगौरवाय प्रसिद्धिं लभते। उक्तञ्च –

उपमाकालिदासस्य भारवेरर्थगौरवम् ।

नैषधे (दण्डिनःवा)पदलालित्यं माघे सन्ति त्रयो गुणाः ।।

यथार्थेनोच्यते 'नारिकेलफलसम्मितं वचो भारवेः '।सूक्तीनामपि प्रयोगः प्राप्यते काव्येऽस्मिन्। यथा - 'हितं मनोहारि च दुर्लभं वचः'। अथवा 'स किं सखा साधु न शास्ति योऽधिपम्'।

अलङ्कृतशैल्याः रचितमहाकाव्येषु किरातार्जुनीयं प्रथममेव भवति। केवलं एक एव अक्षरं व्यवहृत्य एकाक्षरी-श्लोकः प्रदत्तः।

'ननोननुन्नो नुन्नोनो नाना नानानना ननु। नुन्नोऽनुन्नो ननुन्नेनो नानेनानुन्ननुन्ननुत्'।

ऐहोल्-शिलालेखे भारवेर्नाम विद्यते।ततः तस्य आविर्भावसमयः  शिलालेखस्य समयानुसारं 634 खीष्टाब्दे 556 शकाब्दे वा भवेत्।वीररसप्रधाने महाकाव्ये अर्जुन एव       मुख्यनायकः।

## 2.8 माघः

'मेघे माघे गतं वयः'। 'नव-सर्ग-गते माघे नव शब्दः न विद्यते'। 'माघे सन्ति त्रयोगुणाः'। एतासु प्रशंसोक्तिषु माघस्य पाण्डित्वं ज्ञायते। तस्य एकमात्रं महाकाव्यं शिशुपालवधम् विष्णोः माहात्म्यं वर्णयति। भारविना सह प्रतिस्पर्धां कृत्वा माघ इदं रचितवान् इति समालोचकाः तर्कयन्ति। उक्तञ्च - 'तावत् भा भारवेरिति यावन्माघस्य नोदयः' ।  सुराणां संदेशप्रदानाय नारदः द्वारकापुर्यां  अवतरति। शिशुपालस्य विनाशसमयोपस्थित इति

श्रीकृष्णं ज्ञापयति। विंशति-सर्गेषु महाभारतस्य सभापर्वे वर्त्तमानं कथावस्तु संगृह्य नव्य-काव्यम् रचितवान्। अस्मिन् बहु-परिवर्त्तनानि च कृतवान्। एतद् माघकाव्यमित्यपि चकथ्यते। भाषा-शैली-वर्णना-दृष्ट्या भारवि-अपेक्षया माघस्य काव्यमधिकं क्लिष्टम्। 'द' अक्षरेण एकाक्षरीश्लोकः, चित्रकाव्यस्य प्रयोगः, युद्धादीनां वर्णनाधिक्यञ्च तस्य कारणमस्ति।

राजा-वर्मलातस्य नाम वसन्तगड-शिलालेखे वर्त्तते। तमाधारीकृत्य माघस्य समयः निरूप्यते। यतः वर्मलातस्य परिषदि स्थितः सुप्रभदेवः माघस्य पितामह इति ऐतिहासिकैः सूचितम्। शिलालेखः 625 खीष्टाब्दे उत्कीर्णासीत्। अतः माघस्य समयः 650 खीष्टाब्दे भवेदिति मन्यते।

## 2.9 श्रीहर्षः

श्रीहर्षः नैषधीयचरितं महाकाव्यस्य रचयिता। द्वाविंशति-सर्गैः विरचितमिदं काव्यमपि अलङ्कृतशैल्यारुदाहरणं भवति। प्रत्येकसर्गस्य अन्तिमे कविः स्वपरिचयं ददाति। तस्य पितुर्नाम श्रीहीरः मातुर्नाम च मामल्लदेवी। महाभारतीय-नल-दमयन्ती-उपाख्यानमाश्रित्य काव्यमिदं रचितम्। निषध-देशस्य राजा नलःस्वयम्वरे इन्द्र-वरुण-अग्नि-यमान् पराजित्य भीमस्य कन्या-दमयन्त्या सह विवाहं करोति। पञ्चनलेषु दमयन्ती प्रकृतनलं वरमालां प्रयच्छति। सरस्वत्या सहायेन एतद् सम्पाद्यते। श्रृङ्गारपरकमपि प्रथमसर्गे हंसस्य विलापवर्णनेन करुणरसो जायते। अत्र हंसः दूतरूपेण संप्रेषितः।

नैषधे कवेः वर्णनानैपुण्यं विचित्रमेव। तस्य प्रशंसकैरुच्चार्यते – 'नैषधं विद्वदौषधम्'। इत्थमपि चोक्तम् – 'उदिते नैषधकाव्ये क्व माघः क्व च भारविः' ।

श्रीहर्षः कान्यकुब्जेश्वर-जयचन्द्रस्य सभाकविरासीत्।इतिहासकाराणां मतेनजयचन्द्र-विजयचन्द्रयोः शासनकालः 1156-1193 ख्रीष्टाब्द्-समये भवति।ततः श्रीहर्षस्य आविर्भावकालः द्वादश-शतके भवेत्।

श्रीहर्षस्य अन्यकृत्तयश्च सन्ति। यथा -विजयप्रशस्ति-खण्डनखण्डखाद्य-अर्णववर्णना-छिन्दप्रशस्ति-नवसाहसाङ्कचरितचम्पू-स्थैर्यविचारणप्रकरणादयः।




## 2.10 गद्यकाव्यम्

'गद्यं कवीनां निकषं वदन्ति'। सुबन्धु-दण्डी-वाणभट्टाः गद्यकाराः क्रमेण वासवदत्ता-दशकुमारचरितमवन्तीसुन्दरीकथा-हरषचरितंकादम्बरी-ग्रन्थान् रचितवन्तः।

### 2.10.1 दण्डी

षष्ठशतकस्य कविरयं दशकुमारचरितस्य प्रणेता। दशकुमाराणां विच्छेद-पुनर्मिलनञ्च वर्ण्यतेऽत्र। राजहंस-पुत्र-राजवाहनः अन्यैःमन्त्रीपुत्रैः सह मिलित्वादिग्विजयप्रयाणं करोति। गद्यशैल्यां लिखितमपि पदलालित्यहेतोः प्रसिद्धिं लभते काव्यमिदम्। उदाह्रियते यथा – 'कुमारा माराभिरामा रामाद्यपौरुषा रुषाभस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेनयानेनाऽभ्युदयाशंसं राजानमकार्षुः'। 'समासभूयस्त्वमेव गद्यस्य जीवितम्'। तथापि दण्डी सरलगद्येन काव्यं रचयन् पाठकान् मुह्यति। एतद् कथा आख्यायिका वा इति तर्क्यते साहित्यसमीक्षकैः। दण्डिना अवन्तीसुन्दरीकथा लिखिता नवेति शङ्का वर्त्तते। काव्यादर्श-नामा-अलङ्कारशास्त्रमपि तेन रचितम्।

### 2.10.2 वाणभट्टः

भारतीयेतिहासे प्रसिद्धः राजा हर्षवर्द्धनः। तस्य चरितमाश्रित्य वाणभट्टः हर्षचरितं लिखितवान्। एतद् आख्यायिका अस्ति। अतः आख्ययिकायाः लक्षणानुसारं कुवेर-वंशज-चित्रभानु-पुत्र-वाणभट्टः स्ववंशस्य परिचयं ददाति। वत्स-गोत्रिय-वाणभट्टस्य गद्यं क्लिष्टं भवति।तस्य कथा-श्रेणी-भूता कादम्बरी कथा-भाषा-चरितविन्यास-दृष्ट्या अधिकक्लिष्टा। तथापि वाण-गुण-मुग्धाः तस्य प्रशंसां कुर्वन् लिखन्ति –'कादम्बरी रसज्ञाय आहारोऽपि न रोचते'। इदमपि उच्यते –'वाणोच्छिष्टमिदं जगत्'। '...वाणी वाणो वभूवेति'।'...नहि नहि वाणी वाणस्य मधुरशीलस्य'। हर्षवर्द्धनस्य सभायां सः राजकविरासीत्। हर्षस्य समयः 606-648 खीष्टाव्दपर्यन्तमासीत्।

कथायां गुणाढ्यस्य वृहत् कथा उपजीव्य-काव्यरुपेण स्वीकृतम्। विष्णुशर्मणःपञ्चतन्त्रम्,नारायणस्य हितोपदेशः कथासाहित्यं समृद्धं करोति।

## 2.11 चम्पूकाव्यम्

त्रिविक्रमभट्टस्य नलचम्पू सप्तोच्छ्वासविशिष्टं चम्पूकाव्यम्। अस्य समयः खीष्टाव्द-दशमशतक एव। एकादश-शतके रचितं भोजराजस्य चम्पूरामायणम् भाषासारल्यहेतोः सर्वादृतं भवति।

## 2.12 गीतिकाव्यम्

कालिदासस्य मेघदूतम् जयदेवस्य गीतगोविन्दम् गीतिकाव्येषु श्रेष्ठकृती ।

### 2.12.1 जयदेवः

द्वादश-शतके केन्दुविल्वे जयदेवस्य आविर्भाव अभवत्।तेन विरचित-गीतगोविन्दे द्वादशाध्यायाः सन्ति। गीतिमयकाव्यरूपेण गीतगोविन्दं सर्वश्रेष्ठमस्ति। उत्कलप्रदेशस्य कविरयं कृष्णं मुख्यनायकरूपेण चित्रयति। अत्र अङ्गीरसः शृङ्गारः। परन्तु भक्तिरसस्य प्राधान्यं समग्रकाव्ये अनुभूयते। प्रेम्णः पराकाष्ठा परिलक्षते यत्र कृष्णस्य मुखेन जयदेवः लिखति – देहि पदपल्लवमुदारं…। जगन्नाथ-संस्कृत्याः प्रख्यापनं कृतमत्र कविना।

नाट्यकारेषु अन्ये ये नाटयकाराः प्रसिद्धिं लभन्ते ते भवभूति-शूद्रक-विशाखादत्तादयः।

## 2.13 नाट्यकाराः

### 2.13.1 भवभूतिः

महावीरचरितम् तथा उत्तररामचरितम् तस्य नाटकद्वयम्। मालतीमाधवञ्च प्रकरणम्। उत्तररामचरितम् मनस्तात्त्विकनाटकमिति स्वीक्रियते। अत्र करुणरस अङ्गीरसेति भवभूतिना

उद्घोषितम्। परन्तु समालोचकैः करुण-विप्रलम्भ-शृङ्गारः मुख्यरसेति उपस्थाप्यते। नाटक-पात्रेषु छायासीता कवेरभिनवप्रयोगः भवति।

### 2.13.2 **शूद्रकः**

मृच्छकटिकम् सामाजिकरूपकमिति ज्ञायते। एतद् प्रकरणभेदे आयाति। तात्कालिक-समाजस्य प्रकृतरूप-परिवेषणं कृतमत्र। भासविरचित-चतुरङ्कविशिष्ट-चारुदत्तस्य आधारेण लिखतमेतत् प्रकरणे दशाङ्काः वर्त्तन्ते। चारुदत्तस्य परिवर्द्धित-संस्करणमेतद्। नायकः चारुदत्तः ब्राह्मणवणिक् भवति। शृङ्गाररस-प्रधान-प्रकरणेऽस्मिन् गणिका वसन्तसेना नायिका।

### 2.13.3 **विशाखादत्तः**

चणकपुत्रः कौटिल्यः नन्दम् उत्पाटयन् चन्द्रगुप्तमौर्यं राजपदे अधिष्ठापयति। मन्त्री-राक्षसः कथं मुद्रया पराजितो भवति तदेव नाटकस्य विषयवस्तु। अतः मुद्राराक्षसमिति नामकरणम् कृतम्। इदं राजनीतिक-नाटकस्य मान्यतां प्राप्नोति।

**भट्टनारायणस्य** वेणीसंहारम् **हर्षस्य** रत्नावली-नाटिका च रूपकेषु प्रमुखतामाप्नुतः।

**कल्हण-विल्हण-पद्मगुप्तादयानां** काव्यानि ऐतिहासिक-काव्यरूपेण गृह्यन्ते।

संस्कृत-साहित्य-वाङ्मयं पारावारमिव व्यापकं भवति।अत्र केवलं बहुचर्चितकाव्यानां काव्यकाराणाञ्च विवरणं संक्षेपेण आलोचितम्।

+++++++++++++++++

## MODEL QUESTION

**अतिसंक्षिप्तोत्तरप्रश्नाः –**

1- संस्कृतकाव्यं कतिविधम् ?

2- रूपकं कतिविधम् ?

3- प्रशस्तिरत्नावली कस्य कृतिर्भवति ?

4- रघुवंशे कति सर्गाः सन्ति ?

5- अभिज्ञानशाकुन्तले दुष्यन्तः कीदृशः नायकः ?

6- कः 'Father of Indian Drama' इत्युच्यते ?

7- कर्णभारम् केन विरचितम् ?

8- सौन्दरानन्दम् कीदृशं काव्यम् ?

9- गुणाढ्यः किं रचितवान् ?

10- एकस्य ऐतिहासिककाव्यस्य नाम लिखत ।

**टिप्पणी प्रदेया ।**

पञ्चमहाकाव्यम् ,श्रीहर्षः, भारविः, उत्तररामचरितम्, दण्डी, शूद्रकः, जयदेवः, चम्पूरामायणम्।

**दीर्घोत्तरप्रश्नाः –**

1- कालिदास-विरचितानां नाटकानां परिचयं दत्त।

2- गद्यकाव्येषु बाणभट्टस्य काव्यं श्रेष्ठम् - आलोचयत।

3- मृच्छकटिकं शारीपुत्तप्रकरणञ्च कीदृशं काव्यं प्रतिपादयत।

**अतिदीर्घोत्तरप्रश्नाः -**

1- दृश्यकाव्यानां भेदान् निर्दिश्य कस्यापि दृश्यकाव्यस्य विवरणं लिखत।

2- श्रव्यकाव्यं कतिविधम् ? पञ्चमहाकाव्यानां परिचयं प्रदत्त।

---

## FURTHER READING:

---


1- A.Macdonell, History of Sanskrit Literature.

2- H.R.Agrawal,History of Sanskrit Literature.

3- VacaspatiGairola,Samskrut Sahitya ka Itihas.

4- BaldevUpadhyay,SamskrutSahitya ka Itihas.


------------------

## UNIT-03 : वैयाकरणानां परिचयः

3.1 Learning Objective

3.2 व्याकरणस्य संज्ञा

3.3 वैयाकरणानां नामानि

पाणिनिः

कात्यायनः

पतञ्जलिः

भर्तृहरिः

भोजः

हेमचन्द्रः

वोपदेवः

नागेशभट्टः

टीकाकाराः

3.4 सम्प्रदायः शाखाश्च

3.5 Model Question

3.6 Further Reading

## 3.1 Learning Objective

**(पुस्तकस्य पठनेन पाठकाः ज्ञातुं पारयन्ति.......)**

1 -व्याकरणशब्दस्य संज्ञाविषये.........

2 -संस्कृत-व्याकरणस्य उद्भम-विषये..............

3 -संस्कृतव्याकरणग्रन्थानां विषये...........

4 -प्रमुख-संस्कृतवैयाकरणानां विषये.......

5 -व्याकरणस्य प्रतिपाद्य-विषयाणां विषये.......

## 3.2 व्याकरणस्य संज्ञा

**व्याकरणम्**

'व्याक्रियन्ते अर्था येनेति'= व्याकरणम् ।

'व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दा अस्मिन् अनेनेति वा।'

वि+आ+कृ+ल्युट् = व्याकरणम्।

**वैयाकरणः**

व्याकरणं वेत्ति अधीते वा – वैयाकरणः।

व्याकरण + अण्।

व्याकरणं व्याकरोतीति वैयाकरणः।

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः ।

छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते ।।

वेदस्य षडङ्गानि सन्ति। यथा - शिक्षा(Phonetics),कल्पः(Ritual),व्याकरणं(Grammar), निरुक्तं(Etymology),ज्योतिषं(Astronomy),छन्दः(Metrics)। एतेषु शिक्षा अकारादिवर्णानां संज्ञा-प्रयत्नाद्युच्चारणस्थानं प्रक्रियाञ्च निर्द्दशति। साधुशब्दान्वाख्यानं व्याकरणम्। निरुक्तन्तु वर्णागम-वर्णविपर्य्ययस्य निश्चयोक्तिः।

व्याकरणग्रन्थेषु शब्दानामर्थानाञ्च विधि-प्रक्रियादयः सूच्यन्ते।गरुडपुराणे अग्निपुराणे च एकाधिकानां व्याकरण-ग्रन्थानां नामानि प्राप्यन्ते। यथा-

कार्त्तिकेयोक्त-व्याकरणं - कुमारव्याकरणम्

महेशकृत–व्याकरणं -माहेशव्याकरणम्

पाणिनिमुनिकृतव्याकरणं-पाणिनीयव्याकरणम्

शर्व्ववर्म्मकृत-व्याकरणं-कलापव्याकरणम्

क्रमदीश्वरकृत-व्याकरणं-संक्षिप्तसारव्याकरणम्

पद्मनाभदत्तकृत-व्याकरणं -पद्मव्याकरणम्

वोपदेवकृत-व्याकरणं- मुग्धबोधव्याकरणम्

गोस्वामिकृत-व्याकरणं-हरिनामामृतव्याकरणम्

भट्टोजीदीक्षितकृत-व्याकरणं –सिद्धान्तकौमुदीव्याकरणम्

वोपदेवानुसारं अष्ट व्यैयाकरणाः सन्ति। रामायणे च नव वैयाकरणानामुल्लेखः प्राप्यते। ऋक्तन्त्रे (1.4) लिखितमस्ति –‘ब्रह्मा बृहस्पतये प्रोवाच,बृहस्पतिरिन्द्राय,इन्द्रो भरद्वाजाय,भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः।’महाभाष्ये उल्लिखितमस्ति यत् अव्याकृत-शब्दानां पृथक्कीकरणे(प्रकृति-प्रत्ययादीनां व्यवहारे) इन्द्रः दिव्यं वर्षसहस्त्रमयापयत्।तैत्तिरीयसंहितायामुक्तमस्ति व्याकरणरचनायां वायु इन्द्रस्य सहायतामकरोत्।

महाभाष्यकारश्च कतिपयानां वैयाकरणानां नामानि उल्लिखति। चारायणः -भागुरिः -पौष्करस् – काशकृत्स्नः -रौढिश्च। वैयाकरण-परम्परायां ब्रह्मा प्रथमो भवति। स एव व्याकरणशास्त्रस्य आदि-प्रणेता। तत्पश्चात् बृहस्पति-इन्द्र-भरद्वाजादयः क्रमशः व्याकरणशास्त्रमकुर्वन्।

पाणिनिना अष्टाध्यायीग्रन्थे दश वैयाकरणानां नामानि प्रदत्तानि। यथा –

1- तृषिमृषिकृशेःकाश्यपस्य (1-2-25) - काश्यपः

2- लङः शाकटायनस्यैव(3-4-111) - शाकटायनः

3- गर्गादिभ्यो यञ् (4-1-105) - गर्गः

4- कृकणपर्णाद् भारद्वाजे(4-2-145) - भारद्वाजः

5- गिरेश्च सेनकस्य(5-4-112) - सेनकः

6- वा सुप्यापिशलेः(6-1-92) - अपिशलिः

7- अवङ् स्फोटायनस्य(6-1-123) - स्फोटायनः

8- ई3 चाक्रवर्मणस्य(6-1-130) - चाक्रवर्मणः

9- इको ह्रस्वोऽङ्यो गालवस्य(6-3-61)-गालवः

10- लोपःशाकल्यस्य(8-3-19)- शाकल्यः

सिद्धान्तकौमुदीग्रन्थस्य मङ्गलाचरणे त्रयाणां वैयाकरणानांनामानि उल्लिखितानि।

**मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।**

**वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ।।**

मुनित्रयाणां पाणिनि-पतञ्जलि-कात्यायनादीनां नामानि प्रदाय तान् नमस्करोति।

## 3.3 वैयाकरणानां नामानि

**पाणिनिः – (600-350 Century BCE)**

पाणिनिःगान्धारदेशस्य शालातुर-स्थाने आविर्भूतासीदिति शालातुरीयः नाम प्राप्तवान्।लाहोर निकटे स्वात्-कावुल-नदीद्वयमध्येआधुनिकपाकिस्तान्-देशस्य स्वावि जिल्लायां जन्मग्रहणं कृतवान्। 'खाइवर्-पाक्-तुन्-ख्वा'-नाम-स्थाने चर्सद्दा-नगर-निकटे स्थित-पुष्कलावती(अधुना "पश्तो")(स्थापनकालः – 1400 BCE)(34.168*N 71.736*E) षष्ठ-शतक-खीष्टपूर्व-प्राक् गान्धारदेशस्य राजधानी आसीत्। अतः पाणिनेः कालः खीष्टपूर्व-पञ्चशतक-पूर्वमेव भवेत्। सः चतुर्थ-शतके आविर्भूतः भवेदिति मन्यते। तस्यमातुर्नाम दाक्षी, पितुर्नाम पणिन् इति प्रसिद्धम्। (पणिनो मुनेर्युवापत्यम् पाणिनिः। पणिन्+इञ्। न टिलोपः।) छन्दशास्त्र-प्रणेता पिङ्गल-मुनिः पाणिनेः भ्राता इति सूचितम्। वैयाकरण-व्याडिः तस्य समसामयिक आसीत्।

**अष्टाध्यायी -**

सः अष्टाध्यायी-नाम-व्याकरणग्रन्थस्य रचयिता भवति। तत्र अष्ट-अध्यायेषु 3995 संख्यक-सूत्राणामुल्लेखः प्राप्यते।प्रत्येक-अध्यायेषु चत्वारः पादाः सन्ति।प्रारम्भे उल्लिखितानां चतुर्द्दश-माहेश्वर-सूत्राणां प्रत्याहार-सूत्राणां वा प्राधान्यं दरीदृश्यते। महेश्वरस्य नव-पञ्च-वार-(चतुर्द्दश)-ढक्का-वादनेन कृपाप्राप्तः पाणिनिःचतुर्द्दश-माहेश्वर-सूत्राणि रचितवान्।

| स्वरवर्णाः | अन्तस्थ-वर्णाः | व्यञ्जन-वर्णाः | |
|---|---|---|---|
| अइउण्। | हयवरट्। | ञमङणनम्। | हल्। |
| ऋऌक्। | लण्। | झभञ्। (ञ,म,ङ,ण,न,झ,भ, | |
| एओङ्। (य,व,र,ल) | | घढधष्। घ,ढ,ध,ज,ब,ग,ड,द, | |

ऐऔच्। जबगडदश्। ख,फ,छ,ठ,थ,च,ट,त,

(अ,इ,उ, खफछठथचटतव्। क,प,श,ष,स,ह)

ऋ,लृ, कपय्।

ए,ओ,ऐ,औ) शषसर्।

एतद् वर्णसामाम्नाय इत्यपि उच्यते। आदिरन्त्येन सहेताः,(1.1.70)इति सूत्रेणप्रत्याहारं निर्माय अण्,अच्,अक्,हल् ,सुप्,तिङ्-आदि-संक्षेप-वर्ण-ग्राहको(coding)प्रस्तूयते। एतदेव आधुनिक-संगणक-व्यवस्थायां सहायतां करोति।अतः पाणिनिः Father of Linguistics इति ज्ञायते।

प्रचलितान् शब्दान् संगृह्य विश्लिष्यञ्चतेषां साधुत्वमसाधुत्वञ्च प्रमाणीकरोति। न केवलं प्राच्यविद्वद्भि अपितु पाश्चात्यविद्वद्भिः सः प्रशंस्यते। विश्वस्य सर्वासु भाषासु प्रणीत-व्याकरण-ग्रन्थेषु 'अष्टाध्यायी' सर्वश्रेष्ठ-प्रामाणिक-व्याकरणग्रन्थ-रूपेण आद्रीयते। संस्कृतव्याकरणस्य सः जनकः (Father of Grammar)। तस्य हेतोः संस्कृतभाषा अद्यापि प्रचलिता अस्ति।

वैदिक-भाषा 'छन्दस्' इति कथ्यते। पश्चात् लोकेषु प्रचलिता कथितभाषा यास्केन 'भाषा' इति नामिता। परन्तु पाणिनिना एषा व्याकरणादि-सूत्रैः शोधिता वर्गीकृता च। तथा असाधुशब्दान् साधुकृत्वा'संस्कृतम्' इति प्रतिपादिता।( सं+कृ+क्तः।)( सम्यग्कृतं साधु-कृतं वा।)

<u>अन्यकृतयः</u>–

| <u>व्याकरण</u>-ग्रन्थाः | <u>काव्यम्</u> |
|---|---|
| धातुपाठः, गणपाठः, | जाम्बवती-विजय-महाकाव्यम् |

उणादि-सूत्रपाठः, लिङ्गानुशासनम्(पाताल-विजय-महाकाव्यम् वा)

पाणिनीय-शिक्षा, द्विरूप-कोषः

**कात्यायनः –**

कत+यञ् (गर्गादिभ्यो यञ् 4/1/105)

कतस्य ऋषेर्गोत्रापत्यं= कात्यः(गोत्र-प्रत्ययान्तः)

विश्वामित्र-मुख्यस्य कात्य-वंशस्य कुले जातः कात्यायनः न केवलं वार्त्तिककार अपितु गणितज्ञ आसीदिति प्रसिद्धम्।शूल्वसूत्रं तेनैव विरचितं यत्र वैदिक-वेदी-निर्माणाय ज्यामितिक-सूत्राणि प्रदत्तानि।तेन धर्मशास्त्रमपि प्रणीतमित्युच्यते।

सः वररुचि इत्यपि अभिधीयते।वररुचिः शिवस्य अवतार इति उच्चार्यते। उल्लिखितञ्च सः कार्त्तिकेयस्य शिष्य आसीदिति।

महाभाष्यानुसारं कात्यायनः ऐन्द्र-सम्प्रदायस्य अनुयायीति उल्लिखितम्। ऐन्द्र- सम्प्रदायः आधुनिक-महाराष्ट्र-प्रान्ते प्रचलितः भवति। अतः कात्यायनः दाक्षिणात्यः भवेदिति तर्क्यते।('प्रियतद्धिताः दाक्षिणात्याः।') कात्यायनस्य वार्त्तिकसूत्राणि अष्टाध्यायीग्रन्थस्य सूत्राणामुपरि रचितानि सन्ति। गद्य- पद्यात्मक-वार्त्तिक-सूत्राणि पाणिनि-सूत्राणां अपवाद-संशोधन-नियमनञ्च कुर्वन्ति।

**वार्त्तिक-लक्षणम् –**

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्त्तते।

तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा मनीषिणः।।

वार्त्तिकस्य उदाहरणम् -

यथा - 'अभुक्त्यर्थस्यन। वने उपवसति।'(वार्त्तिकसूत्रं)

[[अत्र ‘उपान्वध्याङ्वसः(1.4.48) सूत्रेण उप-अनु-अधि-आङ्-पूर्वस्य वसतेराधारः कर्म स्यात्।

उपवसति}
अनुवसति } वैकुण्ठं हरिः।
अधिवसति }(कर्मणि द्वितीया। 2.3.2)
आवसति }

एतेषाम् उपसर्गाणाम्योगे आधारः कर्म भवति।

अन्यथा आधार अधिकरणं हि भवति। (आधारोऽधिकरणम्। 1.4.45)

यथा - हरिः वैकुण्ठे वसति। (सप्तम्यधिकरणे च। 2.3.36)]]

परन्तुसर्वत्र न प्रयुज्यते। वार्त्तिकसूत्रेणउप-उपसर्ग-पूर्वकस्य वस्-धातोः प्रयोगेऽपिअधिकरणं तिष्ठति। उप+वस्- धातोः उपवासार्थे (अभुक्ति) आधारः कर्म न भूत्वा अधिकरणं भवति।

‘वने उपवसति।’ वनं (कर्म) न भूत्वा वने(अधिकरणं)भवति। अत्र कात्यायनेन पाणिनीय-सूत्रस्य संशोधनं कृतम्।

महाभाष्यस्य वार्त्तिकसूत्राणि कात्येन विरचितमिति पतञ्जलिना एव सूचितम्।

कात्यायनः पाणिनेः समसामयिक आसीदिति मन्यते। तस्य कालः पाणिनेः परं ई.पू. तृतीय-चतुर्थ-शतके भवेदिति समालोचकैः विज्ञापितम्। यतः पाणिनि-विरचित-अष्टाध्यायी-ग्रन्थस्य उपरि तस्य वार्त्तिक-सूत्राणि पर्यवेशितानि सन्ति।

**पतञ्जलिः –**

पतन् अञ्जलिर्नमस्यतया यस्मिन्।

पतत् +अञ्जलि+अत्-टि पररुपम्। (अचोऽन्त्यादि टि। 1.1.64.)

पतन्ति अञ्जलयो नमस्कार्यतया यस्मिन् सः।गोनर्दतीरे(गावः नर्दन्ति यत्र सः= गोनर्द) तपस्यतः कस्यचिदृषेरञ्जलितः पतित इति।

महाभाष्ये 'गोनर्द-शब्दः' एकाधिकवारं प्रयुक्तः। येन सः गोनर्द-वासीति तर्क्यते।(गोनर्दीयस्त्वाह। 1.1.21.) / ( एतद् गोनर्दीयस्य। 3.1.92.) ।पुनः महाभाष्ये "कश्मीरान् गमिष्यामः तत्र सक्तून् पास्यामः"– इति वाक्येन सः कश्मीर-देश-वासीत्यपि च आलोच्यते। परन्तु प्राच्यखण्डस्य आधुनिक-गोण्डा काशी वा तस्य आवासस्थानं भवेदिति विदूषां मतम्।

'उभयथा गोणिकापुत्र' इति (महाभाष्य-1.4.51.)सूत्रेण तस्य मातुः नाम गोणिका इति अनुमीयते। महाभाष्ये प्रश्न-उत्तर-बाहुल्यत्वात् सः बहु-जिह्वाधारी-शेषावतारः नाम्ना परिचीयते। परन्तु एतेषां प्रामाणिकता असिद्धा एव।

कात्यायनस्य वार्त्तिकं तथापाणिने अष्टाध्यायीमाश्रित्य पतञ्जलिः महाभाष्यमरचयत्।अतः तस्य आविर्भा-कालः ख्री.पू. द्वितीय-शतकमिति समालोचकानां मतम्।

**महाभाष्यम् -**

महाभाष्ये 84 आह्निकाः सन्ति। अत्र आह्निकः ग्रन्थभागं सूचयति।

[अह्नि भवः= आह्निकः।]

[अह्ना निर्वृत्तं साध्यं। दिनभवे दिनसाध्ये च।] अर्थात् अहोरात्रे समापयेत् ।

[अहन्+ठञ् (ठञ्स्त्रियां ङीप्।]

महाभाष्यस्य प्रथम-आह्निकः पस्पशाह्निकमिति ज्ञायते। पस्पशः 'स्पश् बाधनस्पर्शनयोः' (भ्वादिगणीयधातुः)।

**भर्तृहरिः –(5th century C.E.)**

भृञ् धारणपोषणयोः ण्वुल् तृचौ(3.1.133।इति तृच्) -भर्त्ता

भर्त्ता हरिरिव -भर्तृहरिः।

'वाक्यपदीयम्'-व्याकरणग्रन्थस्य रचयितृरूपेण भर्तृहरिःप्रसिद्धिमलभत। एषः ग्रन्थः'हरिकारिका''त्रिकाण्डी' वापि कथ्यते। यतः ब्रह्मकाण्ड-वाक्यकाण्ड-पदकाण्ड-नाम्ना काण्डत्रयाणां समाहारः प्राप्यते। ब्रह्मकाण्डे 157 कारिकाः, वाक्यकाण्डे 493 कारिकाः, त्रयोदशखण्डेषु विभक्ते पदकाण्डे 450 कारिकाः वर्त्तन्ते। पदकाण्डं खण्डितमस्ति। स्फोटशब्दं व्यवहृत्य वर्णस्फोट-पदस्फोट-वाक्यस्फोटादीनां व्याख्या पद्याकारेण कृतम्। मीमांसकः कुमारिलभट्टस्तु भर्तृहरेः वाक्यस्फोटं न स्वीकरोति।

स्फोट इति शब्दस्योल्लेखः पाणिनिना अष्टाध्यायीग्रन्थे कृतः। यथा –'अवङ् स्फोटायनस्य' ।(स्फोट एवायनम्)। परन्तु पतञ्जलिना स्फोटशब्दः ध्वनि इत्यर्थे प्रयुक्तः। ध्वनिः सृजन-उच्चारण-ग्रहण-स्फोट-इति गृहीतम्। अत्र शब्दानां ध्वनिः लक्ष्यते।

भर्तृहरिणा तु स्फोट अनादि-निधानं शब्दब्रह्मन् एव इति प्रतिपादितम्। शब्दानां परमाणुं समाहृत्य वर्णैः जायमानाया अनुभूतेः व्यञ्ज्ञएव स्फोटः।

'स्फटत्यर्थोऽनेन -स्फुट -करणे घञ् इति स्फोटः'

वाक्यपदीये वाक् त्रिविधा। पश्यन्ती(वक्ता), मध्यमा(वाक् क्रिया), वैखारी(श्रोता)। वाचः पदस्य च प्रमुखता स्वीक्रियतेऽत्र। ग्रन्थेऽस्मिन् सम्बन्ध-समुद्देश-अवाच्य-विरोध-अनवस्था-अपरव्यापारादीनां विमर्शः कृतोऽस्ति।

भर्तृहरेः समयः पञ्चम-शतक-CE इति ज्ञायते। Yi-Jing(It-Sing) नाम्ना चीन्-देशीय-परिव्राजकः (635-713 CE )भर्तृहरिं दिङ्नागस्य समकालीनमिति उल्लिखति। अतः भर्तृहरेः कालः 450-510 CE भवितुमर्हति।

वाक्यपदीयातिरिक्तं भर्तृहरिः महाभाष्यदीपिका-इति महाभाष्योपरि टीकां लिखितवान्। नीतिशतकादि-शतकत्रयस्य रचयिता एव वाक्यपदीयम्-ग्रन्थं रचितवानिति गवेषकाः मन्यन्ते।

1981 खीष्टाव्दे 'Bhartrhari's Paradox' इति नाम्ना Journal of Indian Philosophyपुस्तके(9:1-17)Hans Herzberger तथा Radhika Herzberger एकं शोधप्रबन्धमुपस्थापितवन्तौ। एषः विषयः गवेषकेषु विशेषाद्दृतिमलभत।

**भोजराजः -(1057-1110 CE )**

'सरस्वतीकण्ठाभरण-शब्दानुशासनम्' इति व्याकरणशास्त्रं तथा'सरस्वतीकण्ठाभरणम्' नामकमलङ्कारशास्त्रं भोजस्य द्वे प्रसिद्धे ग्रन्थे। व्याकरणग्रन्थे अष्ट-अध्यायाः,चत्वारः पादाः,6421 सूत्राणि सन्ति। अन्तिमाध्याये वैदिकप्रकरणं स्वरप्रकरणञ्च विद्यते। विक्रम-एकादश-शतके भोजः धारानगर्य्यां राजा आसीत्। श्रुयते इदं यत् तस्य शासनकाले सर्वाः प्रजाः संस्कृतेन एव वार्त्तालापं कृतवन्तः। तस्य राज्ये संस्कृतं 'लोकभाषा' रूपेण प्रचलिता आसीत्।

**हेमचन्द्रसूरिः -(1200 CE )**

तस्य व्याकरणग्रन्थस्य नाम 'सिद्धहैमशब्दानुशासनम्' । अस्मिन् अष्ट-अध्यायेषु संस्कृत-व्याकरणेन सह प्राकृत-तथा-अपभ्रंश-व्याकरणमपि आलोचितम्। अन्तिमाध्याये प्राकृतेषु महाराष्ट्री-पैशाची-मागधी-शौरसेनी-भाषाणां व्याकरणं प्रदत्तम्।

वोपदेवः - (1300-1340 CE)

'मुग्धबोध', 'कविकल्पद्रुम'-इति ग्रन्थद्वयस्य रचयिता वोपदेवः त्रयोदश-शतके आविर्भूतासीत्। विदर्भनिवासी वोपदेवः यादव-वंशीय-देवगिरि-राज्ञः राजसभामलङ्कृतवान्।

**नागेशभट्टः -(1700-1800 CE )**

भर्तृहरिदिशा व्याकरणशास्त्रस्य दर्शनशास्त्रत्वं प्रतिपादयति 'परमलघुमञ्जुषा'-इति ग्रन्थे। नव्यन्यायस्य पृष्ठभूमौ रचितमिदं शास्त्रम्। शिवभट्टस्य सतीदेव्याःच पुत्रो यं श्र्यङ्गवेरपुरस्य(अधुना प्रयागनिकटे वर्त्तत इति उल्लिखितम्) रामसिंहस्य राजपरिषदि अधिष्ठितासीत्। भट्टोजिदीक्षितस्य पौत्रः हरिदीक्षितः तस्य गुरुः। पतञ्जलि-भर्तृहरि-कौण्डभट्टादीन् अनुसृत्य 'शब्दब्रह्मैव' इति प्रतिपादयति। परन्तु सः वाक् चतस्त्र इति उल्लिखति। परा-पश्यन्ती-मध्यमा-वैखारी च। पुनः परा वाक् शब्दब्रह्मणः भिन्ना इति। सः वाक्यपदीयस्य प्रथमकारिकां भिन्नरूपेण उपस्थापयति।

अस्मात् ज्ञायते यत् – शब्दः लौकिकः परन्तु शब्द-अर्थयोः सम्बन्ध अलौकिकः। ब्रह्मैवेदं सर्वम्, शब्दः ब्रह्मैव ।

बृहन्मञ्जुषा-लघुमञ्जुषा-परममञ्जुषा-नाम्ना ग्रन्थोऽयं त्रयात्मकम्। एके ग्रन्थे त्रयाणां संस्करणानां समावेशेन नामत्रयं सञ्जातम्।

**टीकाकाराः ---**

**जयादित्यः,वामनः – (सप्तम-शतकं-CE)**

अष्टाध्यायीमाश्रित्य 'काशिका' नाम्ना टीका जयादित्य-वामनभ्यां लिखिता। प्रथम-पञ्चाध्यायानां लेखकः जयादित्यः। शेष-त्रयाणाम् अध्यायानां टीकाकारः वामनः।

**हेलाराजः –**

वार्त्तिकस्योपरि अस्य टीका रचिता , यस्य नाम 'वार्त्तिकोन्मेष' इति।

**कैयटः - (एकादश-शतकं-CE)**

महाभाष्यस्य टीकाकारः कैयटः 'महाभाष्यप्रदीप'- इति भाष्यग्रन्थम् अरचयत्। भर्तृहरेः महाभाष्यदीपिका टीका अधुना नोपलभ्यते।

**भट्टोजिदीक्षितः -(1600CE)**

कौमुदी-परम्परायां रचित-टीकासु 'सिद्धान्तकौमुदी' श्रेष्ठा विद्यते। अष्टाध्यायी-ग्रन्थे पाणिनिना रचितानि सूत्राणि प्रकरणानुसारं न प्रदत्तानि। तदेव विषयक्रमेण उपस्थापितं दीक्षितेन। परन्तु एतादृशोपस्थापनस्य प्रारम्भः रूपमाला-नामके ग्रन्थे विमलसरस्वती कृतवान्।

**वरदराजः - (1600CE)**

कोमलमतीनां कृते सिद्धान्तकौमुद्याः संक्षिप्तं संस्करणं कृत्वा सः प्रसिद्धिं प्राप्तवान्। तस्य ग्रन्थस्य नाम 'लघुसिद्धान्तकौमुदी' अस्ति। वरदाराजः भट्टोजिदीक्षितस्य एव शिष्यः ।

**सम्प्रदायः -**

व्याकरणशास्त्रस्य इतिहासे कतिपयानां सम्प्रदाय-शाखानाञ्च उल्लेखः प्राप्यते। यथा –

ऐन्द्र-सम्प्रदायः - इन्द्रः प्रथम-वैयाकरण इत्यस्य सम्प्रदायस्य नाम इत्थं प्रदत्तम्।

**शाखा -**

शाखासु कातन्त्र-शाखा, चान्द्रशाखा, जैनेन्द्रशाखा, शाकटायनशाखा, जौमरशाखा, सारस्वतशाखादयः प्रमुखाः सन्ति।

अत्र वैदिक-वैयाकरण-यास्कादारभ्य पाणिनिं यावत् पुनः पाणिने आरभ्य हेमचन्द्रं यावत् वैयाकरणानां परिचयं प्रदत्तम् ।

## Model Question:

**अतिसंक्षिप्तोत्तरप्रश्नाः --**

1 -वैयाकरण-परम्परायां कः प्रथमः वैयाकरणः ?

2 -कस्मिन् पुराणे व्याकरण-ग्रन्थानां विषये उल्लिखितमस्ति ?

3-पाणिनिना कति संख्यकानां वैयाकरणानां नामानि प्रदत्तानि ?

4 -मुनित्रयं किम् ?

5 -पाणिनेः पितुर्नाम किम् ?

6 -अष्टाध्यायी-ग्रन्थे कति अध्यायाः सन्ति ?

7 -कः व्याकरणस्य जनकः ?

8 -महाभाष्ये कति आह्निकाः सन्ति ?

9 -वाक्यपदीयम् केन विरचितम् ?

10 -भर्तृहरेः मतेन वाक् कतिविधा ?

**संक्षेपेण टिप्पणी लेखनीया --**

माहेश्वर-सूत्राणि, ऐन्द्र-सम्प्रदायः, जयादित्यः-वामनः, वरदाराजः, हेमचन्द्रः, वार्त्तिकसूत्रम्।

**दीर्घोत्तरप्रश्नाः --**

1 – वाक् कतिविधा ? विस्तरेण आलोचयत ।

2 -उपसर्गाणां योगे आधारः किम् भवति ?

3 -संस्कृतव्याकरणस्य टीकाकाराणां परिचयं दत्त ।

4 -कारकप्रकरणे कर्मसंज्ञां सोदाहरणं व्याख्यात ।

**अतिदीर्घोत्तरप्रश्नाः --**

1 -पाणिनेः पतञ्जलेः वा संस्कृतव्याकरणं प्रति अवदानमालोचयत ।

2 -स्फोटवादः किम् ? पाठ्यांशाधारेण आलोचयत ।

## Further Reading:

1- संस्कृत व्याकरणशास्त्र का इतिहास ,युधिष्ठिर मीमांसक,चौखम्बा प्रकाशन,वाराणसी।

**********

# UNIT – 04 : दार्शनिकानां परिचयः

4.1 Learning Objective

4.2 नास्तिक-दार्शनिकाः

4.3 आस्तिक-दार्शनिकाः

4.4 Model Question

4.5 Further Reading

## 4.1 LEARNING OBJECTIVE:

**(पुस्तकस्यपठनेन पाठकाः ज्ञातुं पारयन्ति……)**

1- वेदोsखिलधर्ममूलम् …….

2- दर्शनस्य प्रकारभेदाः……..

3- दार्शनिकानां नामानि…….

4- दर्शनस्य प्रतिपाद्यविषयः ……

5- 'तत्त्वमसि' महावाक्यम् …….

**दार्शनिकानां परिचयः**

भारतीयदर्शनं नास्तिक-आस्तिक-रूपेण द्विविधं भवति। नास्तिकदर्शने चार्वाक्-बौद्ध-जैन-दर्शनानि गृह्यन्ते। षड् दर्शनं यथा- न्याय-वैशेषिक-सांख्य-योग-मीमांसा-अद्वैतवेदान्त-दर्शनानि आस्तिकदर्शनं भवति। अत्र केवलं प्रमुख-दार्शनिकानां विषये आलोच्यते न तु दर्शनस्य विषये ।

---

## 4.2 नास्तिक-दार्शनिकाः

---

**चार्वाक्-दर्शनम् –**

केवलं 'बार्हस्पत्य-सूत्रं'चार्वाक् दर्शनं प्रमाणीकरोति । बृहस्पतिना रचितमिति बार्हस्पत्यमिति उच्यते ।अस्य दर्शनस्योपस्थापनं माधवाचार्यः सर्वदर्शनसंग्रह-ग्रन्थे कृतवानस्ति। चार्वाक्-दर्शनस्य प्राचीननाम 'लोकायतम्' इति उक्तम्। भौतिकसुखवादस्य प्रख्यापनमत्र क्रियते । कामः हि पुरुषार्थः न धर्मः । शरीरमेवात्मा ,मरणे मुक्तिः लभ्यते । बार्हस्पत्यसूत्राणाम् उद्धरणं विविधेषु प्राचीनदर्शनग्रन्थेषु इत्थं सूचितम् । यथा –'काय एवैकः पुरुषार्थः'। 'मदशक्तिवद् विज्ञानम्'। 'चैतन्यविशिष्टः कायः पुरुषः' । 'मरणमेवापवर्गः' ।

**जैनदर्शनम् --**

आदि-तीर्थङ्करः 'पार्श्वनाथः' जैनधर्मस्य प्रवर्तकः भवति। 874-817 ख्री.पूर्वकालेआविर्भूतोऽयं अहिंसा-सत्य-अस्तेय-अपरिग्रह-इति चतुर्विधान् तत्त्वान् उपस्थापयति। ज्ञातृक-क्षत्रियवंशे जातः त्रिशला-सिद्धार्थयोः पुत्रः 'वर्धमानमहावीरः' तीर्थङ्करेषु अन्तिम आसीत्। वैशालीनगर्य्यां पार्श्वनाथस्य 250वर्ष-पश्चात् तस्य जन्म अभवत्। त्रिंशत्-वर्षे सन्न्यासं गृहीत्वा त्रयोदश-वर्षं यावत् साधनां कृतवान् ,कैवल्यं च प्राप्तवान्। द्वीतीय-शतक-ख्री.पूर्वे श्वेताम्बर-दिगम्बर-नाम्ना सम्प्रदाय आगतः । 139-82 CE समये दिगम्बराणामाविर्भावोऽभूत्। तेषां मते केवली (ज्ञानसम्पन्नः पुरुषः केवलं) अन्न-ग्रहणं न

करोति। अपरञ्च स्त्रीणां मोक्षः न भवति । पुरुष-रूपेण जन्मग्रहणादनन्तरं हि मोक्षं लभन्ते स्त्रियः ।

जैनसिद्धान्तानां समुदाय-संख्या 45 अस्ति। उमास्वाति-कुन्दकुन्दाचार्य(द्राविडनाम-कौण्डकुण्डः)-समन्तभद्रादयः विद्वांसः जैनदर्शनस्योपरि ग्रन्थान् रचयित्वा अस्य दार्शनिकत्वं प्रतिष्ठापयन्ति। तद्वत् जैन-न्यायस्योपरि हेमचन्द्रः (1145-1229) प्रमाणमीमांसा-ग्रन्थं रचितवान्।

शंकराचार्यः तस्य 'शारीरिकभाष्ये'जैनानां स्याद्वादस्य खण्डनं कृतवान्।

**बौद्धदर्शनम् -**

बुद्धः 448 BCE समयेजन्मग्रहणं कृत्वा 471BCE वर्षे बुद्धत्वं प्राप्तवान् । 426BCE वर्षे अशीति वयसि सः निर्वाणं लब्धवान्। तस्य उपदेशावल्यः 'त्रिपिटक'-नामके ग्रन्थे समाहृतम्। बुद्धस्य दार्शनिकोपदेशानां संरक्षणार्थं 'सूत्तपिटकम्', 'विनयपिटकम्','अभिधम्मपिटकं'मागधी-भाषायां रचितासीत् । आनन्दस्य सहायेन सूतपिटके बुद्धस्य उपदेशाः संकलिताः। विनयपिटकञ्च उपालेः सहायतायां प्रस्तुतं यत्र भिक्षूणाम् आचार-सम्बन्धी-तत्त्वानि उपस्थापितानि। अभिधम्मपिटके दार्शनिक-तत्त्वानां विवेचनं कृतम्।

तत्परं सौत्रान्तिक-मतानां उपस्थापकः कुमारलात आगतवान्। अभिधम्मकोश-रचयिता वसुबन्धुः वैभाषिक-मतस्य पृष्ठपोषकतां कृतवान्। विज्ञानवादस्य प्रवर्तकः मैत्रेयः 'मध्यान्तविभंगसूत्रं','अभिसमयालङ्कारप्रज्ञापारमितोपदेशशास्त्रं' तथा अन्यान् ग्रन्थान् रचितवान्। अन्ये प्रमुखाः ग्रन्था अपि आसन् । तेषु कतिपयाः यथा – वसुबन्धोः 'अभिधम्मकोशः' ,दिङ्नागस्य 'प्रमाणसमुच्चयम्'तथा अन्ये , शून्यवादस्य प्रचारक-नागार्जुनस्य 'माध्यमिककारिका'दयः ।

## 4.3 आस्तिकदार्शनिकाः

**न्याय-दर्शनम् - (नि इण्- भावकरणादौ घञ् -न्यायः)**

एतत् आन्वीक्षिकी, हेतुविद्या, हेतुशास्त्रं नाम्नापि ज्ञायते। 'न्यायसूत्रं' गोतमेन विरचितम्। मिथिला निवासी गोतमस्य नाम गौतम इत्यपि कथ्यते । तस्य अपरं नाम अक्षपादः, दीर्घतपस् वा । तस्य न्यायसूत्रे पञ्चाध्यायेषु प्रमाण-प्रमेयादि-षोडश-पदार्थानां व्याख्या वर्त्तते। चतुर्थाध्याये गोतमः शून्यवाद-परकं बौद्धमतं खण्डयति । अतः गवेषकाः तं बुद्धस्य समकालस्य, किञ्चित् परकालस्य वा इति मन्यन्ते । गोतमस्य कालः 200 CE वर्षतः 600 BCE वर्षमध्ये भवेदिति अनुमीयते ।

न्यायसूत्रस्य भाष्यकारेषु त वात्स्यायनः, उद्योतकरः, वाचस्पतिमिश्रः, जयन्तभट्टः(न्यायमञ्जरी रचयिता), उदयनाचार्यः(न्यायकुसुमाञ्जलिः) प्रमुखाः सन्ति । त्रयोदश-शतके मिथिलावासी गङ्गेश उपाध्यायः नव्यन्यायस्य नवीनां धाराम् असृजत् । तस्य ग्रन्थस्य नाम 'तत्वचिन्तामणिः'। पञ्चदश-शतकात् परं नवद्वीपे नव्यन्यायस्य सुवर्णयुगः सञ्जातः । रघुनाथशिरोमणेः 'दीधिति' -नामा ग्रन्थः उत्तरकाले सर्वेषां आलोच्य अभवत् । एषा टीका तत्वचिन्तामणेः विवरणं प्रददाति । तद्वत् दीधिति-ग्रन्थस्य बृहती व्याख्या भवति 'गादाधरी' । सप्तदश-शतके आविर्भूय गदाधर भट्टाचार्यः गादाधरीम् अरचयत् ।

**वैशेषिक-दर्शनम् - (विशेषं पदार्थभेदमधिकृत्य कृतो ग्रन्थः ठञ् वैशेषिकः)**

स काश्यप-गोत्रीयः कणादः(600-400 BCE)अस्य दर्शनस्य मुख्यः भवति । सः काश्यपउलूकः नाम्नापि परिचितोऽस्ति । तेन प्रचारितं दर्शनं'वैशेषिकं' जैन-बौद्धदर्शनेभ्यः प्राचीनमस्ति । कणादः परमाणुवादस्य प्रवर्तकः (Propounder of Atomic Theory)इति आख्यायते । 'वैशेषिकसूत्रं' प्राचीन-भारतस्य भौतिक-विज्ञानस्य(Physics)

मूलम् इति उच्चार्यते । अणूनां योगेन पदार्थः सृष्टः । 'द्वि-अणुकः'( Bi-atomic molecules), 'त्रि-अणुकः' ( Tri-atomic molecules) शब्दयोः प्रयोगः परिलक्ष्यते। 'गुरुत्व'स्यापि(Gravity) उल्लेखः वर्त्तते । कणादः सर्वं पञ्चमहाभूतैरेव सृष्टमिति कथयति । यथा - शाकं केवलं जलेन सृष्टम् । कीटं जलेन तेजसा च, पक्षिणः क्षिति-अप्-तेज-मत्रुद्भिः सृष्टाः । मनुष्यः शून्यमपि आवहति । काल-आकाश-मन-आदयः केवलं मनुष्ये विद्यते ।

**सांख्य-दर्शनम् - ( संख्यायतेऽत्र संख्या सम्यग्ज्ञानं साऽस्त्यत्र अण् )**

दर्शनस्यास्य प्रस्तौता 'कपिल'-मुनिरेव । कपिलस्य कालः न प्रमाणितम्, षष्ठ-सप्तम-शतक-ख्रीष्टपुर्वं भवेदिति तर्क्यते ।अतः ऐतिहासिकाः तं वैदिकऋषि-इति विचारयन्ति । तस्य पितुर्नाम कर्दम-प्रजापतिः तथा मातुर्नाम देवहुतीत्यपि उल्लिखितम् । सांख्यदर्शनस्य शास्त्रीय-विवेचनं कृत्वा कपिलः'सांख्यसूत्रं' रचितवान् । षड्-अध्यायेषु 537 सूत्राणां समाहारः वर्त्तते। षष्ठाध्याये सः सांख्य-सिद्धान्तान् संक्षेपेण प्रतिपादयति । चतुर्थाध्याये सूत्राणाम् अवबोधनार्थं आख्यानानां प्रयोगमपि कृतवान् । तस्य अन्येकः ग्रन्थः 'तत्त्वसमास' इति । एषः द्वाविंशति-संख्यक-सूत्राणां समाहारः मात्रम् । सांख्यं द्वैत-दर्शनं भवति । प्रकृतिः पुरुषश्च सृष्टेः मूलकारणम् ।

ईश्वरकृष्णस्य 'सांख्यकारिका' अस्य दर्शनस्य प्रसिद्धःग्रन्थः । पञ्चविंशति-तत्त्वानां समुच्चयेन सृष्टिः प्रकाशिता जायते । महत्-अहङ्कार-गुणैः पञ्चमहाभूत-पञ्चतन्मात्रा-पञ्चज्ञानेन्द्रिय-पञ्चकर्मेन्द्रियाणां समाहारेण च सृष्टिं सृजतः प्रकृतिपुरुषौ । सत्कार्यवादः, गुणस्वरूपं, स्वयंसिद्ध-पुरुषः, सृष्टिक्रम इत्यादिविषयाः सन्निवेशिताः सन्ति। अस्मिन् ग्रन्थे एकादशेन्द्रियेषु मन अपि इन्द्रिय अस्ति ।

**योगदर्शनम् - ( युज् भावादौ घञ् )**

पतञ्जलिः (500-300 BCE ) योगसूत्रं प्रणीतवान्,परन्तु केवलं अनुसन्धातृ-रूपेण । मुख्यवक्ता हिरण्यगर्भ इति उच्यते । पातञ्जल-योगसूत्रे चत्वारः पादाः सन्ति । सूत्रसंख्या च 195 इति । प्रथमे पादे समाधिभेदाः स्वरूपञ्च, तथा सभेदं वृत्तयः सूचिताः । द्वितीये क्रियायोग-अष्टाङ्गयोग-क्लेशकारणंक्षयश्च, तृतीये विभूतयः, चतुर्थे कैवल्य-समाधिसिद्धिश्च वर्ण्यन्ते । योगस्य लक्षणेन चित्तवृत्तिनिरोध एव योग इत्युच्यते । ध्याता-ध्येय-ध्यानं योगस्य मूलं भवति । समाधिश्च द्विविधं -- सम्प्रज्ञात-असम्प्रज्ञात-रूपेण । क्लेशाः पञ्चप्रकाराः, यथा - अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशश्च । यम-नियम-आसन-प्राणायम-प्रत्याहार-धारणा-ध्यान-समाधय अष्टाङ्गयोगस्य स्वरूपम् ।

योगसूत्रस्य टीकासु भोजस्य राजमार्त्तण्ड(भोजवृत्तिः)इति टीका सर्वाधिकं लोकप्रिया विद्यते। नागोजीभट्टस्य लक्ष्मी टीकाऽपि आदृताऽस्ति ।

उनविंश-शताव्दि-अन्तिमभागे विवेकानन्दः योगस्य माहात्म्यं पुनः उद्धृतवान् ।

**मीमांसा-दर्शनम् - (मान – विचारे स्वार्थे सन् अ )**

'मीमांसासूत्रं' जैमिनी-महर्षिणा एव विरचितम् । अन्येषामिव सः अस्य दर्शनस्य प्रवर्त्तकः न इति, यतः आत्रेय-वादरायणादीनां मतानुपस्थापयति । ग्रन्थे षोडशाध्यायाः सन्ति । सूत्रसंख्या 2644 तथा अधिकरणानां संख्या भवति 909 ।प्रारम्भात् द्वादश-अध्यायं यावत् भागस्य नाम 'द्वादशलक्षणी',शेष-चतुरध्यायानां नाम 'संकर्षणकाण्ड' इति । 'देवताकाण्ड' इत्यपि चोच्यते।

मीमांसा वेदस्य धर्मप्रतिपादनस्य प्रमाणमस्ति । पदार्थ- जगत्- शक्ति- आत्मादयः मीमांसायां प्रतिष्ठिताः सन्ति । प्रमा-अनुमान-उपमानानां व्याख्यापि कृता । अस्य भाष्यकारेषु उपवर्षः

(100-200 CE)प्राचीनतमः वृत्तिकारः तथा शवरस्वामी (200 CE)भाष्यकार इति स्वीकृतम् । सर्वापेक्षया कुणारिलभट्टः (650-725CE) बहु-चर्चितोऽस्ति । शब्द-अर्थयोः सम्बन्ध-स्थापन-प्रसङ्गे कुमारिलस्य 'अभिहितान्वयवादः' , प्रभाकरस्य 'अन्विताभिधानवादः' सर्वत्र आलोच्यते ।

**अद्वैतवेदान्त-दर्शनम् - (द्विधा इतं द्वीतं -तस्य भावः स्वार्थे वा अण् । द्वैधी भावे द्वैतं। न द्वैतम्।) (वेदस्य अन्ते-6ष्ठी त.पु.)**

उपनिषद् वेदस्य अन्तभागे रचिता इति वेदान्त-नाम्ना परिचिताः सन्ति । परन्तु अत्र वेदान्त-दर्शनस्य मूलं भवति उपनिषद् । उपनिषदामाधारेण सिद्धान्तान् प्रतिपादयन्ति यस्मिन् दर्शने तदेव वेदान्तदर्शनम् । बादरायण-व्यासः भिक्षूणां कृते ब्रह्मसूत्रम् अरचयत् । अतः इदं 'भिक्षुसूत्रम्' इत्यपि उक्तम् भवति । व्यास-ब्रह्मसूत्रे चतुरध्यायेषु 550संख्यकानि सूत्राणि सन्ति । प्रत्येकाध्याये चतुष्पादाः सन्ति । प्रथम-चतुःसूत्राणि 'चतुःसूत्री' इति प्रसिद्धम् । तस्य समयः 500-200-BCE मध्ये भवेदिति ऐतिहासिकैः सूच्यते ।

अद्वैतवेदान्तस्य सर्वस्वीकृतः पृष्ठपोषकः जगद्गुरुः श्रीशंकराचार्यः । काशी तस्य कर्मस्थलमासीत् । मालावारस्य नम्बुद्री-ब्राह्मणः,788 खीष्टाव्दे जन्मितः, शंकराचार्यः 820 CE तमे वर्षे दिवत्वं गतः । द्वात्रिंशत्-वर्ष-अवधिं यावत् सः बहु-ग्रन्थान् अरचयत् । सः ब्रह्मसूत्रमुपरि 'शारीरिकभाष्यम्'उल्लिख्य तत्र निर्विशेषाद्वैत-सिद्धान्तं पोषयति । उपनिषदां भाष्यं, ब्रह्मसूत्रस्य भाष्यं कृतवान् । 'सौन्दर्यलहरी', 'उपदेशसाहस्री' तथा अन्यान् ग्रन्थानपि अरचयत् । गौडपादस्य शिष्यः गोविन्दभगवत्पादः, तस्य शिष्यः भवति शंकराचार्यः । सः वैशेषिक-तथा-बौद्ध-मतान् खण्डयति । अद्वैत-प्रतिपादक-आचार्यं मण्डनमिश्रं तर्के पराजित्य श्रेष्ठ-गुरुरभवत् । परन्तु शंकराचार्य-कृते गोडपाद एव परमगुरुर्भवति । तत्त्वमसि- इति वाक्यम् उद्घोष्य अद्वैतवेदान्तस्य श्रेष्ठत्वं प्रतिष्ठापयति ।

अन्येऽपि प्राचीनाचार्या आसन् येषां ग्रन्थाः नोपलब्धाः, त एव आत्रेयः, काशकृत्स्नः, जैमिनी आदयः । भाष्यकारेषु रामानुजः (1140 CE ), विशिष्टाद्वैत-सैद्धान्तिकः श्रीभाष्यः, अणुभाष्यकृत् वल्लभश्च प्रशंसार्हाः सन्ति ।

अद्वैतवेदान्त-दर्शनस्य प्रतिपाद्य-विषयोऽस्ति - अध्यास-अध्यारोप-विवर्त्तवाद-माया-ईश्वर-मोक्षादयः ।

अस्मात् ज्ञायते यत् सर्वाणि दार्शनिकतत्त्वानि वेद एव वर्त्तते । गोतमः, कपिलः, पतञ्जलिश्च सर्वे ऋषयः सन्ति । वैदिक-कालस्य अन्तिम-पर्य्यायः 1500-500 BCE मध्य इति इतिहासकारैः स्वीकृतम् । दार्शनिक-ऋषिभिः अस्मिन् एव समये तेषां सूत्रात्मक-ग्रन्थान् अरचयन् । कालेऽस्मिन् उपनिषदः रचिताः । वेदे प्रकृति-पुरुषयोः कल्पना 'द्वा सुपर्णा….'इति मन्त्रे वर्त्तते यत् सांख्यस्य मूलं भवति ।नासदीय-आदि-दार्शनिकसूक्तेषु पुरुषसुक्ते च विराट्-पुरुषः सृष्टेः एकमेव कारणमिति प्रतिपादितम् । उक्तञ्च स्मृतिकारेण मनुना - 'वेदोऽखिलधर्ममूलम्' इति ।

******************

## 4.4 MODEL QUESTION

**अतिसंक्षिप्तोत्तरप्रश्नाः --**

1- बार्हस्पत्यसूत्रं किम् ?

2- चार्वाक् दर्शनस्य अन्यनाम किम् ?

3- जैनदर्शनस्य कः प्रवर्त्तकः ?

4- कदा दिगम्बराणाम् आविर्भावोऽभूत् ?

5- प्रमाणमीमांसा केन विरचितम् ?

6- बुद्धः कदा निर्वाणं प्राप्तवान् ?

7- बौद्धधर्मस्य आदिग्रन्थस्य नाम किम् ?

8- अभिधम्मकोशः केन रचितम् ?

9- कः न्यायसूत्रस्य रचयिता ?

10- कः गोतमः ?

11- आधुनिक-भौतिक-विज्ञानस्य मूलं कस्मिन् दर्शनशास्त्रे प्राप्यते ?

12- सांख्यमते एकादशेन्द्रियस्य नाम किम् ?

13- कः जैमिनी ?

14- भिक्षुसूत्रं किम् ?

15- व्यास-रचित-ब्रह्मसूत्रस्य समयं सूचयत ।

**संक्षेपेण उत्तरं दत्त ।**

जैनदर्शनम् , मीमांसाशास्त्रम् , बुद्धः , न्यायभाष्यकाराः , सांख्यकारिका, योगसूत्रम् , शंकराचार्यः ।

**दीर्घोत्तरप्रश्नाः –**

1- नास्तिकदर्शनं किम् विस्तरेण आलोचयत ।

2- अद्वैतवेदान्तदर्शनस्य दार्शनिकानां परिचयं दत्त ।

3- दर्शनशास्त्रं प्रति कुमारिलस्य अवदानं किम् – प्रकाशयत ।

**अतिदीर्घोत्तरप्रश्नाः -**

दार्शनिकानां विषये सविस्तरं विवरणं लिखत ।

## 4.5 FURTHER READING:

1- Chatterjee & Datta, An Introduction to Indian Philosophy.Calcutta.

=================